नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

२४ चतुःशरण-प्रकिर्णकसूत्रम्

सटीकं

(प्रथमं प्रकिर्णकम्)

(वीरभद्रमुनिप्रणितं मूलसूत्रम् +विजयविमलगणिविरचिता-वृत्तिः/अवचूर्णिः)

वृ. इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात् श्रेयोभूतं अतस्तदारम्भे ग्रन्थकृत् मङ्गलरूप-सामायिकाद्यावश्यकार्थकथनमावमङ्गलकारणद्रव्यमङ्गलभूतगजादि १४ स्वप्नोद्धारव्यासवतीर्थ-कृद्गुणस्मरणधर्मोपदेशदीक्षाशिक्षाविहारनिर्वाणरूपकल्याणकपञ्चकं मङ्गलत्रयमाह–'सावज्जे'ति, अथवा षडावश्यकयुतस्यैव प्रायश्चतुःशरणप्रतिपत्त्यादियोग्यता स्यादतः प्रथमं षडावश्यकमाह–

मू. (१) *सावज्जजोगविरई २ उक्कित्तण २ गुणवओ अ पडिवत्ती ३ ।*
खलिअस्स निंदणा ४ वणतिगिच्छ ५ गुणधारणा ६ चेव ॥

वृ. 'सावज्जे'त्यादि, सहावद्येन–पापेन वर्तन्ते इति सावद्याः योगा–मनोवाक्कायरूपा व्यापा-रास्तेषां विरति–निवृत्ति सावद्ययोगविरति सा सामायिकेन क्रियते इत्यध्याहारः १, उत्कीर्त्तनं–जिनगुणानामुत्कीर्त्तना, सा चतुर्विंशतिस्ततेन क्रियते २, गुणा–ज्ञानदर्शनचारित्राद्याः ते विद्यन्ते येषां ते गुणवन्तो–गुरवस्तेषां प्रतिपत्ति–भक्तिर्गुणवत्प्रतिपत्ति सा वन्दने क्रियते ३, स्खलनं स्खलितं–आत्मनोऽतिचारापादनं तस्य निन्दनं–निन्दना न पुनः करिष्ये इत्यभ्युपगमनं सा प्रतिक्रमणेन क्रियते ४, व्रणस्य–अतिचाररूपभावव्रणस्य चिकित्सा–प्रतीकाररूपा सा कायोत्सर्गेण क्रियते ५, गुणा–विरत्यादयो मूलगुणोत्तरगुणरूपास्तेषां धारणं धारण सा प्रत्याख्यानेन क्रियते ६, 'चैवे'ति षण्णामपि समुच्चये ॥

अथ किञ्चिद्विशेषत एतेषां सामायिकादीनां षण्णामपि स्वरूपं चारित्रविशुद्ध्यादिरूपं फलं चाह–

मू. (२) *चारित्तस्स विसोही कीरइ सामाइएण किल इहयं ।*
सावज्जेअरजोगाण वज्जणाऽऽसेवणत्तणओ ॥

वृ. 'चारित्ते'त्यादि, चारित्रस्य–चारित्राचारस्य पञ्चसमितित्रिगुप्तिरूपस्य विशोधनं विशोधि–निर्मलता क्रियते, केन ?–सामायिकेन–समभावलक्षणेन 'किले'ति सत्ये' 'इहयं'ति इहैव जिनशासनेनान्यत्र शाक्यादिदर्शने, तेषु सामायिकपरिभाषाया अप्यभावात्, कथं सामायिकेन विशोधि क्रियते ? इत्याह–'सावज्जे'त्ति सावद्याः–सपापाइतरे च–निरवद्या ये योगाः–कायादिव्या-पारास्तेषां यथासङ्ख्ये ये वर्जनासेवने ताभ्यां वर्जनासेवनातः सावद्यानां वर्जनतः इतरेषां त्वासेव-नतश्च तेन विशोधि क्रियते इति तात्पर्यार्थः ।

उक्ता चारित्राचारविशुद्धिः, अथ दर्शनाचारविशुद्धिमाह–

मू. (३) *दंसणयारविसोही चउवीसायत्थएण किज्जइ अ ।*
अब्भुअगुणकित्तणरूवेण जिनवरिंदाणं ॥

वृ. 'दंसणे' त्यादि, दर्शनं–सम्यक्त्वं तस्याचारो–निरशङ्कितेत्याद्यष्टविधः तस्य विशोधि–निर्मलता चतुर्विंशतेरात्मनां– जीवानां तीर्थङ्करसम्बन्धिनां स्तवः क्रियते यत्र स चतुर्विंशत्यात्मस्तवो–लोगस्सेत्यादिरूपस्तेन क्रियते, 'चउवीसाइत्थएणे' ति पाठेजिनानां चतुर्विंशत्याः स्तवेनेत्यर्थः, चकारो द्वितीयावश्यकसमुच्चयार्थः, चतुर्विंशतिस्तवेन क्रियते, किंभूतेनेत्याह–'अब्भुअ' इत्यादि, अत्यद्भुताः–सर्वातिशायिनो लोकोद्योतकरादयो ये गुणास्तेषां यदुत्कीर्त्तनं–वर्णनं तद्रूपेण, केषां तदित्याह–'जिनवरिंदाणं' ति जिना–रागादिजयादुपशान्तमोहादयस्तेषां मध्ये वराः–केवलिनस्तेषां इन्द्रा इव इन्द्रास्तीर्थङ्करा जिनवरेन्द्रास्तेषामित्यर्थः ॥

उक्ता दर्शनाचारविशुद्धिः, इदानीं ज्ञानाचारस्य चारित्राचारदर्शनाचारयोश्च विशेषेण विशुद्धिमाह–

मू. (४) *नाणाईआ उ गुणा तस्संपन्नपडिवत्तिकरणाओ ।*
वंदनएणं विहिणा कीरइ सोही उ तेसिं तु ॥

वृ. 'नाणाईआ' इति 'नाण' त्ति ज्ञानाचारः–कालविनयाद्यष्टविधः आदिशब्दाद्दर्शनचारित्राचारग्रहो, ज्ञानदर्शनचारित्रयुक्त एव वन्दनकार्हो नान्यो ज्ञानवानपि पार्श्वस्थादिव्यवहारतः चारित्रवानपि निह्नवादिरिति ज्ञापनार्थः, ज्ञानमादौ येषां ते ज्ञानादिकाः, 'तुः' अवधारणे, एतेन ज्ञानादिका एव गुणा इत्यर्थः, तैर्ज्ञानादिगुणैस्सम्पन्ना–युक्तास्तत्सम्पन्नाः गुरवस्तेषां प्रतिपत्तिः–भक्तिस्तस्याः करणं तस्मात् तत्सम्पन्नप्रतिपत्तिकरणाद्विनयकरणादित्यर्थः, केन ? –वन्दनकेन, कथं ? –विधिना–द्वात्रिंशद्दोषरहिततया पञ्चविंशत्यावश्यकविशुद्धतया च, 'तेसिं तु' त्ति तेषां–ज्ञानाचारादीनां तुः पुनरर्थे चारित्राचारदर्शनाचारयोः प्राक्शोधितयोरपि पुनर्विशेषेण शोधि क्रियते इत्यर्थः ।

उक्ता वन्दनकेन ज्ञानाद्याचारत्रयशुद्धिः, सम्प्रति प्रतिक्रमणकायोत्सर्गाभ्यां गाथाद्वयेन तामाह–

मू. (५) *खलियस्स य तेसिं पुणो विहिणा जं निंदणाइ पडिकमणं ।*
तेणं पडिकमणेण तेसिंपि य कीरए सोही ॥

वृ. स्खलितस्य–व्रतविषयस्यातिक्रमव्यतिक्रमादिप्रकारसंजातापराधस्य तथा 'तेसि' त्ति तेषां–ज्ञानाचारादीनां पुनः प्रतिषिद्धकरणकृत्याकरणाश्रद्धानविपरीतप्ररूपणादिप्रकारसंजातातिचारस्य च विधिना–सूत्रोक्तप्रकारेण 'जं निंदणाइ' इति यन्निन्दनं निन्दना–दुष्टं मयैतत् कृतमिति, आदिशब्दाद्गर्हादिग्रहः, गुरुसाक्षिकमात्मदोषाविष्करणं गर्हा, एवंप्रकारस्खलितस्य यन्निन्दनादिकरणं–तस्माद्दोषजातान्निवर्त्तनं तत्प्रतिक्रमणमुच्यते इति शेषः, प्रतीपं क्रमणं प्रतिक्रमणं इति व्युत्पत्ति, अतः कारणात्तेन प्रतिक्रमणेन 'तेसिं पिय' त्ति न केवलं सामान्यतो व्रतादिविषयापराधानां, किन्तु तेषामपि ज्ञानाचारादीनां क्रियते विशोधि–निर्मलतेति ।

मू. (६) *वरणाइयाइयाणं जहक्कमं वणतिगिच्छरूवेणं ।*

पडिकमणासुद्धाणं सोही तह काउसग्गेणं ॥

वृ. 'चरणाइय'त्ति चरणं—चारित्रं अतिगच्छन्ति—अतिक्रामन्तीति चरणातिगाः, अतिचारा इति ह्यर्थः, ते आदौ येषां ते चरणातिगादिकाः—सर्वेऽप्यतिचारास्तेषां चरणातिगादिकानां, कथंभूतानां?—प्रतिक्रमणेन—प्रागुक्तेनाशुद्धानामर्द्धशुद्धानां वा शुद्धिस्तथैव—प्रागुक्तप्रकारेण क्रियते, केन?—कायोत्सर्गेण, किंभूतेन?—'जहक्कमं वणतिगिच्छ'त्ति यथाक्रमं—क्रमप्राप्तेन 'आलोअणपडिकमणे' इतिगाथोक्तदशविधप्रायश्चित्तमध्ये पञ्चमप्रायश्चित्तेन 'वण'त्ति द्रव्यभावभेदेन द्विधा व्रणं, तत्र द्रव्यव्रणः—कण्टकभङ्गादिजनितो भावव्रणस्तु अतिचारशल्यरूपस्तस्य भावव्रणस्य चिकित्सा—प्रतीकारः सैव रूपं यस्य कायोत्सर्गस्य स व्रणचिकित्सारूपस्तेन, कायोत्सर्गेणातिचाराः शोध्यन्ते इति भावो, महन्निर्जराकारणत्वात् तस्य, प्राक् 'नाणाइआ' इत्यत्र ज्ञाननयप्राधान्याश्रयणात् ज्ञानादय इत्युक्तं, 'चरणाइआ' इत्यत्र तु क्रियानयप्राधान्याश्रयाणाच्च विवक्षया चरणादय इति

एवं गाथापञ्चकेनातिचारत्रयस्य शुद्धिरुक्ता, अथ तपोवीर्याचारयोस्तामाह—

मू. (७) *गुणधारणरूवेणं पच्चक्खाणेण तवऽइयारस्स।*
विरियायारस्स पुणो सव्वेहिवि कीरए सोही ॥

वृ. 'गुणधारणे'त्यादि, गुणा—विरत्यादय इत्यरेतरा [illegible] तृष्णाव्यवच्छेदस्तस्मादतुलोपशमस्तस्मात्प्रत्याख्यानशुद्धिस्तच्छुद्धेश्चारित्रनैर्मल्यं तस्मात्कर्मविवेकस्तस्मादपूर्वकरणमपूर्वकरणात्केवलज्ञानं ततश्च मोक्षो भवतीति, तेषां गुणानां धारणं तदेव रूपं यस्य तेन प्रत्याख्यानेन—'अनागयमइक्कंतं' इत्यादिदशविधेन अथवा पञ्चमहाव्रतद्वादशश्राद्धव्रतनमस्कारसहितादिदशप्रत्याख्यानरूपसप्तविंसतिविधेन वा तपआचारातिचारस्य—'बारसविहंमिवि तवे' इति गाथोक्तस्य शुद्धि क्रियते इति संटंकः।

'विरियायारस्स'त्ति विशेषेण ईरयति—प्रेरयति आत्मानं तासु तासु क्रियास्विति वीर्यं—तपोवीर्य—गुणवीर्य—चारित्रवीर्य—समाधिवीर्य—आत्मवीर्यभेदभिन्नं पञ्चविधं तस्याचारो वीर्याचारः 'अणिगूहिअबलविरिए' इत्यादिकस्तस्य सर्वैरपि पूर्वोक्तैः षड्भिरप्यावश्यकैः शुद्धि क्रियते, अन्यूनाधिकावश्यककरणप्रयत्नेन वीर्याचारशुद्धिर्भवत्येव, महाकर्मनिर्जराहेतुत्वात् ॥

उक्ता आचारपञ्चकशुद्धिः, अथ सर्वजिनगुणोत्कीर्तनगर्भं मङ्गलभूतं गजादिस्वप्नसंदर्भमाह—

मू. (८) *गय १ वसह २ सीह ३ अभिसेय ४ दाम ५ ससि ६ दिनयरं ७ झयं ८ कुम्भं ९।*
पउमसर १० सागर ११ विमाणभवण १२ रयणुच्चय १३ सिहिं १४ च ॥

वृ. गाथा सुगमा, नवरं 'अभिसेअ'त्ति चतुर्थस्वप्ने पार्श्वद्वयवर्तिकरिकलभशुण्डादण्डविधृतकलशयुगलाभिषिच्यमानां लक्ष्मीं जिनमाता पश्यति, 'विमाणभवण'त्ति द्वादशस्वप्ने देवलोकागततीर्थकृज्जननी विमानं पश्यति नरकागतजिनजननी तु भवनं, विमानभवनयोराकारमात्रकृत एव विशेषः, गजदर्शनात्स्वाम्यपि तद्वदतुलपराक्रमनिधिर्भावी, वृषभदर्शनात् महामोहपङ्कमग्नधर्मरथधुरोद्धरणक्षमो भरते धर्मबीजवापनिमित्तं च भावीति स्वप्नैरपि जिनगुणाः सूच्यन्ते, चतुर्दशस्वप्नसंख्यया तु चतुर्दशरज्ज्वात्मकस्यापि लोकस्योपरिवर्ती पुत्रो भविष्यतीति निवेद्यते इति सर्वतीर्थकृद्गुणवर्णनरूपं स्वप्नमङ्गलमुक्तम्।

अथ श्रीवीरनमस्काररूपं तृतीयं मङ्गलं प्रस्तुताध्ययनप्रस्तावनां चाह–

मू. (९) *अमरिंदनरिंदमुणिंदवंदिअं वंदिउं महावीरं ।*
कुसलानुबंधिबंधुरमज्झयणं कित्तइस्सामि ॥

वृ. 'अमरिंदनरिंद'त्ति उपक्रमकृतेनापमृत्युना न म्रियन्ते इत्यमरास्तेषां इन्द्रा अमरेन्द्राः नराणामिन्द्रा नरेन्द्रा मुनीनामिन्द्रा मुनीन्द्राः द्वन्द्वः तैर्वन्दितं 'वन्दिउं'ति वन्दित्वा, कं? –'महावीरं' महद्वीर्यं यस्यानन्तबलत्वाद्देवकृतपरीक्षायामपि मनागप्यक्षुभितत्वाच्च महावीरस्तं 'कुसलानुबंधि'त्ति कुशलो–मोक्षस्तं अनुबन्धीति–परम्परया ददातीत्येवंशीलं कुशलानुबन्धि, तथा बन्धुरं–मनोज्ञं, जीवानां ऐहिकामुष्मिकसमाधिहेतुत्वात्, किं? –अधीयते–ज्ञायते परिच्छिद्यतेऽर्थसमुदायोऽस्मादित्यध्ययनं–शास्त्रं, कीर्त्तयिष्यामि–कथयिष्यामीति सम्बन्धः ।

अथ प्रस्तुताध्ययनार्थाधिकारानाह–

मू. (१०) *चउसरणगमण १ दुक्कडगरिहा २ सुकडानुमोअणा ३ चेव ।*
एस गणो अनवरयं कायव्वो कुसलहेउत्ति ॥

वृ. 'चउसरण'त्ति चतुर्णामर्हत्सिद्धसाधुधर्माणां शरणगमनं प्रथमोऽधिकारः, दुष्ठं कृतं दुष्कृतं तस्य गर्हा–गुरुसाक्षिकमात्मदोषकथनं द्वितीयोऽधिकारः, शोभनं कृतं सुकृतं तस्यानुमोदना–भव्यं मयैतत्कृतमिति तृतीयोऽधिकारः, 'चैवे'ति समुच्चये, एषः–अयं गणः–त्रयाणां समुदायोऽनवरतं–सततं कर्त्तव्यः–अनुसरणीयः कुशलो–मोक्षस्तस्य कारणमयमितिकृत्वा ॥

अथ चतुःशरणरूपं प्रथमाधिकारमाह–

मू. (११) *अरिहंत १ सिद्ध २ साहू ३ केवलिकहिओ सुहावहो धम्मो ४ ।*
एए चउरो चउगइहरणा सरणं लहइ धन्नो ॥

वृ. 'अरहंते'त्यादि, देवेन्द्रकृतां पूजामर्हन्तीत्यर्हन्तः १ तथा सिध्यन्ति–निष्ठितार्था भवन्तीति सिद्धाः २ तथा निर्वाणसाधकान् योगान् धर्मव्यापारान् साधयन्ति–कुर्वन्तीति साधवः ३ तथा दुर्गतौ पतन्तं प्राणिनं धरतीति धर्मः, किंभूतः? –केवलिभिः–ज्ञानिभिः कथितः–प्रतिपादितः केवलिकथित इति, अनेन स्वमतिकल्पितान्यतीर्थिकधर्मनिरास माह, पुनः कथम्भूतो धर्मः सुखमावहति–परम्परया चटत्यकर्षं प्रापयतीति सुखावहः, अनेन इहलोकेऽपि मिथ्यादृष्टिधर्मस्य भैरवपतनशिरःक्रकचदापनादिदुःखाकीर्णत्वात् परलोके भवभ्रमणकारणत्वात्तन्निषेधमाह, एतेऽर्हत्सिद्धसाधुधर्माश्चत्वारश्चतसृणां गतीनां समाहारश्चतुर्गति–नरकतिर्यग्नरामरलक्षणां हरन्ति सिद्धिलक्षणपञ्चमगतिप्रापणेनेति चतुर्गतिहरणाः, यस्मादिति गम्यं, अत एव भवाटव्यामटन् शरणरहितः कश्चिज्जन्यः–सुकृतकर्मा एव शरणं लभते, शरणत्वेन प्रतिपद्यते इत्यर्थः ॥

अथ यथा विधिना एतान् शरणं प्रपद्यते तथाऽऽह–

मू. (१२) *अह सो जिणभत्तिभरुत्थरंतरोमंचकंचुअकरालो ।*
पहरिसपणउम्मीसं सीसंमि कयंजली भणइ ॥

वृ. 'अह सो'त्ति, अथ सः–शरणप्रतिपत्ता चतुर्विधसङ्घस्यान्यतमो जीवः, कथंभूतो? –जिनेषु भक्तिस्तस्या भरः–प्राबल्यं तस्माज्जिनभक्तिभरात् 'उत्थरंत'त्ति अवस्तृणन्–उदयं गच्छन्योऽसौ रोमाञ्चः स एव शरीरावारकत्वात्कञ्चुको रोमाञ्चकंचुकस्ते करालः–अन्तरङ्गशत्रूणां

भीषणः, तथा प्रकृष्टो हर्षः प्रहर्षः तस्माद्यत्प्रणतं–प्रणामस्तेन उन्मिश्रं–व्याकुलं यथा भवति एवं, यद्वा प्रहर्षवशाद्योऽसौ प्रणयः–आनन्दाश्रुगद्गदस्वरस्तेनोन्मिश्रं, क्रियाविशेषणमेतत्, तथा शिरसि–मस्तके कृताञ्जलि–कृतकरकुड्मलः सन् भणति।

अर्हच्छरणमङ्गीकुर्वन् यदसौ भणति तद्गाथादशकेनाह–

मू. (१३) *रागद्दोसारीणं हंता कम्मट्ठगाइअरिहंता।*
विसयकसायारीणं अरिहंता हंतु मे सरणं॥

वृ. 'रागद्दोसा०' इति, रागस्त्रिधा दृष्टिरागकामरागस्नेहरागभेदात्, द्वेषः–परद्रोहाध्यवसायः, अथवाऽभिष्वङ्गमात्ररागः अप्रीतिमात्रं द्वेषः, एतयोरुपलक्षणत्वात् मदमत्सराहंकाराणां ग्रहः त एवारयो रागद्वेषारयस्तेषां हंतारो रागद्वेषारिहंतारः, तथा कर्मणां–ज्ञानावरणादीनां अष्टकं कर्माष्टकं तदादौ यषां ते कर्माष्टकाद्यरयस्ते च ते अरयश्च कर्माष्टकाद्यरयः, आदिशब्दात्परीषहवेदनोपसर्गादिग्रहः, तेषां हन्तारः, षष्ठीलोपोऽत्र द्रष्टव्यः।

तथा विषयाः–शब्दरूपगन्धरसस्पर्शा कषायाः–क्रोधमानमायालोभाः अनन्तानुबन्ध्यादिभेदास्त एव जीवानामनर्थकारित्वात् अरयस्तेषां हन्तारः, पाञ्चात्यं हन्ता इति पदमत्रापि सम्बध्यते, अथवा विषयकषायाणां विनाशकत्वेनारयस्तीर्थङ्करा विषयकषायारयः, णमिति वाक्यालङ्कारे, एवंविधा अर्हन्तो–जिना मे–मम शरणं–परित्राणं भवन्त्वित्यर्थः।

मू. (१४) *रायसिरिमवकसित्ता तवचरणं दुच्चरं अनुचरंता।*
केवलसिरिमरिहंता अरहंता हुंतु मे सरणं॥

वृ. 'रायसिरि०'त्ति, राज्यश्रियं–राज्यलक्ष्मीं अपकृष्य–अवधूय त्यक्त्वेत्यर्थः, तथा तप्यते कर्ममलापनयनेनात्मा सुवर्णमिवाग्निनाऽनेनेति तपस्तस्य चरणं–आसेवनं, कथंभूतं दुश्चरं–सामान्यसाधुभिः कर्तुमशक्यं वार्षिकषण्मासादिरूपं अप्रमत्ततामौनकायोत्सर्गादिक्रियाविशेषितमजलं च तत्तपोऽनुचर्य–आसेव्य ये केवलश्रियं–केवलज्ञानविभूतिमर्हन्तः तस्या योग्या भवन्तीत्यर्थ तेऽर्हन्तः–तीर्थकृतो मे शरणं भवन्त्विति सर्वत्र योज्यं, अथवा प्रथमांतान्येव पदानि योज्यानि।

राज्यश्रियमपकर्षयन्तः–त्यजन्तस्तथा तपश्चरणं दुश्चरमनुचरन्तः केवलश्रियं चार्हन्तः–प्राप्नुवन्तो ये ते शरणं, एतेन पूर्वोक्तेन राज्यश्रीत्यागतपश्चरणकरणकेवलश्रीप्रापणरूपावस्थात्रयशरणगमनप्रतिपादनेन यद्यपि शक्रादीनां सर्वास्वप्यवस्थासु जिना नमस्कारार्हास्तथापि ते गृहवासस्थाः साधूनां न नमस्करार्हा अविरतत्वादिति दर्शितं, यच्चानागतजिनाः साधुभिर्नमस्क्रियन्ते तेऽपि भाविभावचारित्रावस्था एवेति भावः॥

मू. (१५) *थुइवंदणमरिहंता अमरिंदनरिंदपुअमरहंता।*
सासयसुहमरहंता अरहंता हुंतु मे सरणं॥

वृ. 'थुइवंद०'त्ति, स्तवः 'थुइ' पाठे स्तुतिर्वा–सद्भूतगुणोत्कीर्तनं वन्दनं–कायिकः प्रणामः तौ अर्हन्तः–तयोर्योग्या जगतोऽपीति शेषः, अमरेन्द्रनरेन्द्राणां पूजां–समवसरणादिकां समृद्धिं अर्हन्तः–तस्या अपि योग्या भवन्तः, तथा शश्वत् भवं शाश्वतं तच्च तत्सुखं च शाश्वतसुखं–निर्वाणादनन्तरं तदप्यर्हन्ति–तस्या अपि योग्या भवन्तीत्यर्हन्तः, शेषं पूर्ववत्॥

मू. (१६) परमनमथं मुणंता जोइयनाणेयनाणभरिता।
धम्मकहं अरहंता अरहंता हुंतु मे सरणं ॥

वृ. 'परमन०'त्ति, परेषां—आत्मव्यतिरिक्तानां मनांसि परमनांसि तेषु गतं स्थितं चिन्तितं इत्यर्थः तत् मुणन्तो—जानन्तः 'मुणत् प्रतिज्ञाने' इति धातुः 'ज्ञो जाणमुणा' 'वित्यादेशो वा, एतेन अनुत्तरसुराणां मनःसंशयपरिज्ञानतद्व्युच्छेदसमर्था जिना इत्युक्तं, तथा योगिनो मुनयस्तेषामिन्द्राः—गौतमादयःमहान्तश्च ते इन्द्राश्च महेन्द्राः—शक्रादयस्तेषां ध्यानं—स्थिराध्यवसायरूपं तदर्हन्तीति योगीन्द्रमहेन्द्रध्यानार्हा।

तथा धर्मकथांदानशीलतपोभावनादिकां कथयितुमर्हन्तः—तस्याः कथनयोग्याः सर्वज्ञत्वेन सर्वभाषानुयायियोजनगामिवागतिशयत्वेन, छद्मस्थावस्थायां तु मौनावलम्बित्वेन धर्मकथानर्हत्वाज्जिनानां, शेषं प्राग्वत् ॥

मू. (१७) सव्वजिआणमहिंसं अरहंता सच्चवयणमरहंता।
बंभव्वयमरहंता अरहंता हुंतु मे सरणं ॥

वृ. 'सव्व०'त्ति सर्वे सूक्ष्मबादरत्रसस्थावरा ये जीवास्तेषां न हिंसा अहिंसा—रक्षा तामर्हन्तः तथा सतां हितं सत्यं—तथ्यं तच्च तद्वदनं च तदेवार्हन्तोऽसत्यभाषणहेतुरागद्वेषमोहरहि-तत्वात्तेषां, तथा ब्रह्मव्रतं अष्टादशभेदं।

॥१॥ 'दिव्यौदारिककामानां' कृतानुमतिकारितैः।
मनोवाक्कायतस्त्यागो, ब्रह्माष्टदशधा मतम् ॥

इति श्लोकोक्तमासेवितुं प्ररूपयितुमनुमोदयितुं चार्हन्तः, शेषं तथैव ॥

तथा 'ओस'त्ति अवस्रियते—गम्यते संसारभयोद्विग्नैः जीवैरित्यवसरणं समवसरणमित्यर्थः तदवसृत्य—अलंकृत्य, तथा चतुस्त्रिंशतो—जन्मजकर्मक्षयजसुरकृतान् यथाक्रमं चतुरेकादशैकोनविंशतिसङ्ख्याप्रसिद्धानतिशयान्निषेव्य, उपलक्षणत्वात्पञ्चत्रिंशद्वचनातिशयांश्च, तथा धर्मकथां कथयित्वा ये मुक्तिं यान्ति यास्यन्ति जाता इत्यध्याहार्यं 'कहंता' इति पाठे धर्मकथां कथयन्तो ये वर्त्तन्ते ते शरणं, पूर्वं धर्मकथाकथनयोग्या इत्युक्तं अत्र तु धर्मकथां कथयन्त एवेति न पौनरुक्त्यं, अत्र चाध्ययनेऽन्यत्रापि यत्र कुत्रचित् पौनरुक्त्यसम्भवः तत्र स्तुत्युपदेशरूपत्वेन न दोष इति ज्ञेयं, यदुक्तं—

॥१॥ 'सज्झायज्झाणतवोसहेसु उवएसथु इपयाणेसु।
संतगुणकित्तणेसु अ न हुंति पुनरुत्तदोसा उ ॥

शेषं तथैव।

मू. (१८) ओसरहणमवसरंता चउतीसं अइसए निसेवित्ता।
धम्मकहं च कहंता अरहंता हुंतु मे सरणं ॥

मू. (१९) एगाइ गिराऽनेगे संदेहे देहिणं समं छित्ता।
तिहुअणमनुसासंता अरिहंता हुंतु मे सरणं ॥

वृ. 'एगाइ गिर'त्ति एकयाऽपि गिरा—एकेनापि वचनेन अनेकप्रकारान् संदेहान्—संशयान्, केषां ?—देहिनां—सुरासुरनरतिर्यगरूपाणां समं—समकालमेव छित्त्वा संशयत्रुटिं कृत्वेत्यर्थः 'समुच्छित्ते'ति पाठे समुच्छिद्येतदि ज्ञेयं, त्रिभुवनमनुशास्य—शिक्षयित्वा अनुशासयन्तो वा

सम्यक्त्वदेशविरतिसर्वविरतिलक्षणशिक्षाप्रदानेन, मोक्षं यान्तीति योगः, शेषं तथैव ॥

मू. (२०) *वयणामएण भवणं निव्वावंता गुणेसु ठावंता ।*
जिअलोअमुद्धरंता अरिहंता हुंतु मे सरणं ॥

वृ. 'वयणा' इति वचनमेवामृतं वचनामृतं क्षुत्पिपासादिदोषापहारकत्वात् तेन वचनामृतेन भुवनं–लोकं निर्वाप्य–तस्य तृप्तिमुत्पाद्य निर्वापयन्तो वा प्रीणयन्तः आप्याययन्त इत्यर्थः, तथा गुणेषु–उत्तरोत्तरगुणस्थानकेषु सम्यक्त्वदेशविरतिप्रमत्ताप्रमत्तादिकेषु प्रागुक्तं भुवनमेव स्थापयित्वा वा सदुपदेशवशात्तानि प्रापयन्त इत्यर्थः, तथा जीवलोकं–भव्यजीवलोकं, अभव्यास्तु तीर्थकरोपदेशेनापि नावबुध्यन्ते, तमुद्धृत्य उध्धरन्तो वा भवान्धकूपात् स्ववचनरज्जुनाऽऽकर्षयन्त इत्यर्थः, शेषं पूर्ववत् ॥

मू. (२१) *अच्चब्भुअगुणवंते निअजससंसहरपसाहियदिअंते ।*
निअयमणाइमणंते पडिवन्नो सरणमरिहंते ॥

वृ. 'अच्चब्भुअ' त्ति अत्यद्भूता–अन्येष्वसंभविनो ये गुणाः–प्रातीहार्यलिदलक्षणाः अन्ये वा रूपादयस्ते विद्यन्ते येषां ते अत्यद्भुतगुणवन्तस्तान्, तथा निजयश एव शशधरः–चन्द्रस्तेन प्रसाधिता–विभूषिता दिगन्ता–दिक्पर्यन्ता यैः 'पयासिअ' त्ति पाठे प्रकाशिता वा यैस्तान् नियतं शाश्वतं यथा भवत्येवं सदैवेत्यर्थः, न आदि न चान्तो येषां ते अनाद्यनन्तास्तान् शरणं प्रपन्नः तानाश्रित इत्यर्थः, एतेन कालत्रयभाविनोऽनंता अपि जिना गृहीताः ॥

मू. (२२) *उज्झिअजरमरणाणं समत्तदुक्खत्तसत्तसरणाणं ।*
तिहुअणजणसुहयाणं अरिहंताणं नमो ताणं ॥

वृ. अथ कृतार्हच्छरणो विशेषेण तेषां नमस्कारमाह–'उज्झि' त्ति, उज्झितानि–त्यक्तानि जरामरणानि यैस्तत्कारणकर्मरहित्वात्ते उज्झितजरामरणास्तेभ्यः, समस्तानि–सम्पूर्णानि यानि दुःखानि तैरार्ता क्रता वा–पीडिता ये सत्वाः–प्राणिनस्तेषां शरण्याः–शरणे साधवस्तेभ्यः, यद्वा समाप्तं–निष्ठां गतं दुःखं येषां ते समाप्तदुःखाः, तथा आर्ता–जन्मजरामरणादिदुःखैः पीडिता ये सत्वास्तेषां शरण्याः, समाप्तदुःखाश्च ते आर्तसत्वशरण्याश्चेति विशेषणकर्मधारयः तेभ्यः ।

– तथा त्रिभुवनजनानां सुखं ददति निजावतारेणेति त्रिभुवनजनसुखदास्तेभ्यः, सर्वत्र चतुर्थ्यर्थेषष्ठी 'छट्ठीविभत्तीइ भण्णइ चउत्थी' इतिप्राकृतसूत्रबलात्, तेभ्यः–पूर्वोक्तगुणेभ्योऽर्हद्भ्यो नमो–नमस्कारोऽस्तु ॥ अथ द्वितीयं शरणं यथा प्रतिपद्यते तथाऽऽह–

मू. (२३) *अरिहंतसरणमलसुद्धिलद्धसुविसुद्धसिद्धबहुमाणो ।*
पणयसिररइअकरकमलसेहरो सिद्धरिसं भणइ ॥

वृ. 'अरिहंत' त्ति अर्हन्तां शरणमर्हच्छरणं तेन पूर्वोक्तेन या मलस्य–कर्मरजसः शुद्धिस्तया लब्धः शुद्धो–निर्मलः सिद्धान् प्रति बहुमानो–भक्तिर्येन स तथा, 'सुविसुद्ध' त्ति पाठे तु सुष्ठु–अतिशयेन विशुद्धो–निर्मल इत्यर्थः, पुनः किंभूतः ? –प्रणतं–भक्तिवशेन नम्रीभूतं यच्छिरस्तत्र रचितः करकमलाभ्यां शेखरो येन स तथा, एवंभूतः सन् सहर्षं भणति ॥

मू. (२४) *कम्मट्ठक्खयसिद्धा साहाविअनाणदंसणसमिद्धा ।*
सव्वट्ठलद्धि सिद्धा ते सिद्धा हुंतु मे सरणं ॥

वृ. यश्चायं भणति तद्गाथाषट्केनाह–'कम्मट्ठ'त्ति, कर्माष्टकक्षयेण सिद्धाः–प्रसिद्धाः ते तीर्थसिद्धादिभेदेन पञ्चदशधा, तानाह–

तीर्थसिद्धाः प्रसन्नचन्द्रसनत्कुमारादयः १ अतीर्थसिद्धा मरुदेव्यादिकाः २ गृहलिङ्गसिद्धाः पुण्ड्राढ्यादिकाः ३ अन्यलिङ्गसिद्धा वल्कलचीर्यादिकाः ४ स्वलिङ्गसिद्धा जम्बूस्वाम्यादिकाः ५ स्त्रीलिङ्गसिद्धा राजीमत्यादिकाः ६ नरसिद्धा भरतादिकाः ७ कृत्रिमनपुंसकसिद्धाः गुणसेनादिकाः ८ प्रत्येकबुद्धसिद्धा नमिराजादिकाः ९ स्वयंबुद्धसिद्धाः समुद्रपालादिकाः १० बुद्धबोधितसिद्धाः त्रिकाधिकपञ्चदशशततापसादिकाः ११ एकसिद्धाः गजसुकुमालादिकाः १२ अनेकसिद्धा भरतपुत्रादिकाः १३ अजिनसिद्धाः पुण्डरीकगौतमादिकाः १४ जिनसिद्धा आदिनाथादिकाः १५।

पुनः कथंभूताः ? –स्वकार्यविधे–निरूपणे ये अनन्तशक्तिरूपे ज्ञानदर्शने ताभ्यां समृद्धाः–स्फीताः स्फातिमन्तः, तथाऽर्थ्यन्ते–अभिलष्यन्ते इत्यर्था सर्वे च तेऽर्थाश्च तेषां लब्धयः–प्राप्तयः सर्वार्थलब्धयः सिद्धाःनिष्पन्नाः सर्वार्थलब्धयो येषां ते तथा, सिद्धसर्वकार्या–प्राप्तसर्वसुखज्ञानादिभावाः कृतकृत्या इत्यर्थः, आर्षत्वात् सिद्धशब्दस्याग्रे निपातः, सर्वार्थलब्धिभिः सिद्धानिष्ठिता इत्येवं वा समासः, ते सिद्धा मम शरणं भवन्तु।

मू. (२५) *तिअलोयमत्थयत्था परमपयत्था अचिंतसामत्था।*
मंगलसिद्धपयत्था सिद्धा सरणं सुहपसत्था॥

वृ. 'तिअलोय'त्ति, त्रैलोक्यस्य–चतुर्दशरज्ज्वात्मकस्य यन्मस्तकं–वोपरिवर्तिस्थानं पञ्चचत्वारिंशल्लक्षयोजनविस्तीर्णषट्चाग्भाराख्यसिद्धिशिलाया उपरितनयोजनसत्कोपरितनचतुर्विंशतितमभागरूप आकाशदेशस्तत्र तिष्ठन्तीति त्रैलोक्यमस्तकस्थाः, तथा परमपदं–मोक्षपदं सर्वकर्मरहितत्वरूपं तद्धेतुत्वाच्चारित्रादिक्रियाकलापस्य तत्र तिष्ठन्तीति ते तथा, अचिन्त्यमनन्तत्वात् सामर्थ्यं–जीवशक्तिविशेषो बलं येषां ते तथा।

मङ्गलरूपाः सिद्धाः–सम्पन्नाः पदार्था येषां ते तथा, यद्वा सांसारिकदुःखरहितं मङ्गलभूतं यत् सिद्धिपदं तत्र तिष्ठन्ति इति ते तथा, ते सिद्धाः शरणं भवन्तु, पुनः कथंभूताः ? –सुखेन जन्मजरामरणक्षुत्तृषाबाधारहितेन मुक्तिप्रभवेन प्रशस्ताः अव्याकुला अनन्तसुखा इत्यर्थः।

मू. (२६) *मूलुक्खयपडिवक्खा अमूढलक्खा सजोगिपञ्चक्खा।*
साहाविअत्तसुक्खा सिद्धा सरणं परमसुक्खा॥

वृ. 'मूलुक्खय'त्ति, मूलादुत्खाताः–उन्मूलिताः प्रतिपक्षाः–कर्मरूपा यैस्ते तथा, समूलनिर्मूलितकर्माण इत्यर्थः, 'मूलक्खए'त्ति पाठेऽयमर्थो–मूलस्यसंसारहेतुकर्मबन्धमूलस्य मिथ्यात्वाविरतिकषाययोगरूपस्य शत्रुसङ्घातस्य क्षये कर्तव्ये प्रतिपक्षा इव–वैरिण इव तत्क्षयं कृतवन्त इत्यर्थः, तथा लक्ष्ये–द्रष्टव्यपदार्थे न मूढा अमूढलक्षाः सदोपयुक्तत्वात्तेषां, तथा सयोगिनां–सयोगिकेवलिनामेव प्रत्यक्षा–दृश्याः, शेषज्ञानिनां अविषयत्वात् सिद्धानां।

–तथा स्वाभाविकं–अकृत्रिममात्तं–गृहीतमाप्तं–प्राप्तं वा सुखं यैस्ते तथा, पुनः किंविशिष्टाः परमः–प्रकृष्टोऽत्यन्तं विगमात्कर्मभि सह मोक्षो–वियोगः पृथग्भावो येषां ते तथा, ते सिद्धाः शरणं भवन्तु॥

मू. (२७) *पडिपिल्लिअपडिणीआ समग्गझाणग्गिदड्ढभवबीआ ।*
जोईसरसरणीया सिद्धा सरणं समरणीआ ॥

वृ. 'पडिपिल्लिअ'त्ति, प्रतिप्रेरिताः—क्षिप्ता अनाध्ता इत्यर्थ प्रत्यनीकाः—शत्रवो यैः समशत्रुमित्रत्वात्, यद्वा प्रतिप्रेरिता—निराकृताः प्रत्यनीका—निराकृताः प्रत्यनीका—रागाद्यान्तरशत्रवो यैस्ते तथा, समग्रं—सम्पूर्णं यद्ध्यानं परमलयः शुक्लध्यानमित्यर्थ तदेवाग्नि—वह्निस्तेन दग्धं—भस्मसातकृतं भवस्य—संसारस्य बीजं—ज्ञानावरणीयादि कर्म यैस्ते तथा, योगीश्वरा—गणधरा-श्छद्मस्थतीर्थकरा वा तै शरणीयाः—आश्रयणीया नमस्करणध्यानादिना, तथा स्मरणीया—ध्येया मोक्षसुखाभिलाषुकाणां भव्यानामिति शेषः, एवंविधाः सिद्धाः शरणं भवन्तु ॥

मू. (२८) *पाविअपरमानंदा गुणनिस्संदा विदिन्नभवकंदा ।*
लहुईकयरविचंदा सिद्धा सरणं खविअदंदा ॥

वृ. 'पाविअ'त्ति, प्रापितः—आत्मजीवं प्रति द्यौकितः प्राकृतत्वाद्वा प्राप्तः परमानन्दो यैः सदामुदितत्वात्ते तथा, तथा गुणानां—ज्ञानदर्शनादीनां परिपाकप्राप्तत्वान्निस्यन्दः—सारो येषु ते तथा, सर्वसारज्ञानादिगुणा इत्यर्थः, विदीर्णो—विदारितः स्फाटितो भवस्य—संसारस्य मोहनीयादिकर्मरूपः कन्दो यैस्ते तथा, लोकालोकप्रकाशकलेवलोद्योतन लघुकीकृतौ—अल्पप्रभा-वीकृतौ रविचन्द्रौ यैः तदुद्योतस्य परिमितयोजनप्रकाशकत्वात्ते तथा, तथा क्षपितं—क्षयं नीतं द्वन्द्वं—संग्रामादिरूपं यैस्ते तथा, सर्वथा निष्कायत्वात्, ते एवंविधाः सिद्धाः शरणं भवन्तु ।

मू. (२९) *उवलद्धपरमबंभा दुल्लहलंभा विमुक्कसंरंभा ।*
भुवनधरधरणखंभा सिद्धा सरणं निरारंभा ॥

वृ. 'उवलद्ध'त्ति, उपलब्धं—प्राप्तं परमब्रह्म—प्रकृष्टं ज्ञानं, यैस्ते उपलब्धपरमब्रह्माणः, समवाप्तकेवलज्ञाना इत्यर्थः, तथा दुर्लभो लम्भः—लाभो मुक्तिपदप्राप्तिलक्षणो येषां सर्वलाभाग्रे-सरत्वात्तलाभस्य सर्वचारित्रादिक्रियाणां तल्लाभे एव साफल्याच्च, तथा विमुक्तः—परित्यक्तः करणीयपदार्थेषु संरंभः—आटोपो यैस्ते तथा, निष्पन्नसर्वप्रयोजनत्वात्तेषां ।

-तथा भुवनं- [भुवनं—त्रिभुवनं तदेव गृहं तस्य धरणं—अवष्टम्भनं तत्र स्तम्भा इव स्तम्भाः, भुवनलोकस्य दुर्गतौ पततः स्वशरणप्रतिपत्तु स्थिराधारभूतत्वात्तेषां] जीवलोकस्तदेव यद्गृहमिव गृहं तस्य संसारगर्तायां पततो धरणे—रक्षणे स्तम्भा इव स्तम्भाः, तथा 'निरारम्भा' निर्गता—बहिर्भूता आरम्भेभ्यः, सर्वथा कृत्यकृतत्वात्तेषां, ते एवंभूताः सिद्धा मम शरणं—आलम्बनं भवन्तु ॥ एतेन सिद्धाख्यं द्वितीयं शरणमभिहितं ॥

अथ साधुशरणं प्रतिपित्सुर्यदभिधत्ते तदाह—

मू. (३०) *सिद्धसरणेण नयबंभहेऊ साहुगुणजणिअअनुराओ ।*
मेइणिमिलन्तसुपसत्थमत्थओ तत्थिमं भणइ ॥

वृ. 'सिद्ध'त्ति, नया—नैगमादयस्तैरुपलक्षितं यद्ब्रह्म—श्रुतज्ञानं द्वादशाङ्गरूपं 'नयभङ्गप्रमाण- गमगहन'मिति वचनात्तस्य नयब्रह्मणो ये हेतवः—कारणभूताः साधुगुणा विनयादयो, विनयादिगुण सम्पन्नस्यैव श्रुतावाप्तेः, तेषु नयब्रह्महेतुषु साधुगुणेषु जनितः—उत्पादितोऽनुरागो—बहुमानो यस्य स नयब्रह्महेतुसाधुगुणजनितानुरागः शरणप्रतिपत्ता साध्वादि—केनास्यानुरागः कृत इत्याह— सिद्धशरणेन—पूर्वोक्तेन ।

पुनः कथंभूतः सः ?–मेदिन्याः–पृथ्व्या मिलत्–लुठत् सुप्रशस्तं भक्तिभरनम्रत्वान्मस्तकं –उत्तमाङ्गं यस्य स मेदिनीमिलत्सुप्रशस्तमस्तकः, एवंविधः स साधुगुणरागी भूतलन्यस्तमौलि सन् तत्रेतिशरणप्रस्तावे इदं–वक्ष्यमाणं भणति–वक्ति ॥

मू. (३१) *जिअलोअबंधुणो कुगइसिंधुणो पारगा महाभागा ।*
णाणाइएहिं सिवसुक्खसाहगा साहुणो सरणं ॥

वृ. यदयं भणति तन्नवभिर्गाथाभिराह–'जिअलोअ'त्ति, जीवलोकस्य–प्राणिवर्गस्य षड्जीवनिकायात्मकस्य त्रिविधं त्रिविधेन रक्षाकारित्वात् बन्धव इव बन्धवः, कुत्सिता गतिः कुगतिः, नरकतिर्यगादिरूपा सैव सिन्धुः–महानदी समुद्रो वा तस्यास्तस्य वा पारं–तीरं गच्छन्तीति पारगाः–तीरवर्तिनः सुगतिगामित्वादेव साधूनां, तथा महान् भागः–अतिशयविशेषो येषां ते तथाऽनेकलब्धिसम्पन्नत्वात्तेषां, तथा ज्ञानादिकैः–ज्ञानदर्शनचारित्रैरेव शिवसौख्यं–मोक्षशर्म साधयन्ति ये ते शिवसौख्यसाधकाः, एतेन तीर्थान्तरीयैर्जलस्नानादिक्रियाभिर्मोक्षसाधनमुक्तं तन्निरासः कृतो द्रष्टव्यः, त एवंविधाः साधवो मम शरणं भवन्तु ॥

मू. (३२) *केवलिणो परमोहिविउलमइसुअहरा जिनमयंमि ।*
आयरियउवज्झाया ते सव्वे साहुणो सरणं ॥

वृ. साधुभेदानाह–'केवलं' असहायं–मत्यादिज्ञानानपेक्षं सर्वद्रव्यपर्यायादिविषयं ज्ञानं विद्यते येषां ते केवलिनः, 'परमोहि'त्ति अवधि–मर्यादा रूपिद्रव्येषु प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधि परमश्चासाववधिश्च परमावधिः यदुत्पत्तेरनन्तरमवश्यमन्तर्मुहूर्तेन केवली भवति उत्कृष्टमवधिज्ञानमित्यर्थस्तद्योगात्साधवोऽपि परमावधयः,. उत्कृष्टावधिसाधुभणनेन जघन्यमध्यमावधयोऽपि साधयोऽन्तर्भाविता ज्ञेयाः ।

'विउलमइ'त्ति मनःपर्यायज्ञानं द्विधा–ऋजुमतिविपुलमतिभेदात्, तत्र विपुला मतिर्ऋजुमत्यपेक्षया विशिष्टज्ञानत्वेन येषां ते विपुलमतयः, इह विपुलमतिग्रहणेन ऋजुमतयोऽपि गृहीता ज्ञातव्याः, द्वयेषामप्येषां मनुष्यक्षेत्रान्तर्वर्तिसंज्ञिपञ्चेन्द्रियमनोद्रव्यपरिच्छेदकत्वात्, बह्वल्पपर्यायग्रहणादिनैव विशेषाच्च, तथा श्रुतं–कालिकोत्कालिकाङ्गप्रविष्टानङ्गप्रविष्टादिलक्षणं सूत्रार्थोभयरूपं धरन्ति–योग्यशिष्यप्रशिष्यादिप्रदानेनाव्यवच्छिन्नं कुर्वन्तीति श्रुतधराः सामान्यतः सर्वेऽपि विशेषेण तु आचर्यन्ते–आसेव्यन्ते मोक्षार्थिभिरित्याचार्याः–पञ्चविधाचारधारिणः सूत्रार्थोभयवेदिनो गच्छावलम्बनभूताः षट्त्रिंशद्गुणवन्तोऽर्थव्याख्यानकारिणः, उपेत्यःआगत्य अधीयते येभ्य इत्युपाध्यायाः–सूत्रार्थोभयवेदिनो द्वादशाङ्गसूत्राध्यापका उपाध्यायाः, एते च आचार्योपाध्यायाः सामान्यतो लौकिकाः कालाचार्यादयोऽपि लभ्यन्ते इति तद्यवच्छेदायाह–

'जिनमयंमि'त्ति जिनमते–जिनशासने ये आचार्योपाध्यायाः, एतद्ग्रहणं चोपलक्षणम्, तेन प्रवर्तकस्थविरगणावच्छेदका अप्यत्र गृहीता ज्ञातव्याः, सर्वशिष्यान् तपःसंयमव्यापारेषु प्रवर्तयन्तो गणतन्त्रिकराः प्रवर्तका उच्यन्ते, प्रवर्तकव्यापारितार्थेषु सीदमानान् साधून् स्थिरीकुर्वन्तः स्थविराः, गच्छयोग्यक्षेत्रोपध्यादिसंपादनार्थं नवनवक्षेत्रविहारकारिणो गणावच्छेदकाश्च, ते च सर्वे केवलिप्रभृतिसाधवः शरणं भवन्तु ॥

मू. (३३) *चउदस दसनवपुव्वी दुवालसिक्कारसंगिणो जे अ ।*

जिनकप्पअहालंदिअ परिहारविसुद्धिसाहू अ ।।

वृ. तथा चतुर्दश पूर्वाणि विद्यन्ते येषां ते चतुर्दशपूर्विणः श्रीप्रभवादयः दशाद्यान्येव पूर्वाणि येषां ते दशपूर्विणः श्रीआर्यमहागिर्यादयः, अन्त्यानि चत्वारि पूर्वाणि प्रायः समुदितान्येवव्युच्छिद्यन्ते इति चतुर्दशपूर्व्यनन्तरं दशपूर्विणोऽभिहिताः ।

तथा नवपूर्विणः श्रीआर्यरक्षितादयः, पूर्वशब्दः सर्वत्रयेऽपि [illegible]ते ।

तथा 'दुवालस'त्ति अग्रेतनाङ्गीशब्दसंबन्धात् द्वादशाङ्गिनः, ननु चतुर्दशपूर्विणां द्वादशाङ्गिनां च को भेद इति चेद्, उच्यते द्वादशमङ्गं दृष्टिवादः, स च परिकर्म १ सूत्र २ पूर्वानुयोग ३ पूर्वगत ४ चूलिका ५ भेदात्पञ्चविधः, पूर्वाणि च चतुर्दशापि पूर्वगतमध्ये सन्ति द्वादशाङ्गस्यैकदेशभूतान्येवेति पूर्वधरद्वादशाङ्गधरभेदसिद्धिः, तथा एकादशाङ्गिनश्च ये च, चकारो भिन्नक्रमसूचकः ।

संप्रति विशेषानुष्ठानिन आह–'जिनकप्प'त्ति एकाकित्वेन निष्प्रतिकर्मशरीरतया च जिनस्येव कल्पः–आचारो येषां ते जिनकल्पिका–दुष्करक्रियाकारिणः 'अहालंदिअ'त्ति उदकार्द्रः करो यावता कालेन शुष्यति तत् जघन्यं लन्दं तत आरभ्योत्कृष्टं पञ्चरात्रिन्दिवलक्षणं तदत्र गृह्यते, उत्कृष्टलन्दस्यानतिक्रमेण चरन्तीति यथालन्दिकाः, पञ्चको गणोऽमुं कल्पं प्रतिपद्यते, मासकल्पक्षेत्रं च गृहपङ्क्तिरूपाभिः षड्भिः वीथिभिर्जिनकल्पिकवत् परिकल्पयन्ति, एकैकस्यां च वीथ्यां पञ्च पञ्च दिनानि पर्यटन्ति, जिनकल्पिकास्त्वेकमेव दिनं सप्तम एव दिने पुनस्तस्यां वीथ्यां समागच्छन्ति इत्येतेषां भेदः, तथा परिहारविशुद्धिकाश्च साधवः, ते चैवं–

नव साधवोऽमुं कल्पं प्रतिपद्यन्ते, तेषां मध्ये षण्मासान् यावत् चत्वारस्तपः कुर्वन्ति, चत्वारोऽनुपारिहारिकत्वमेकश्च कल्पस्थितत्वं–गुरुत्वमित्यर्थः, एते पञ्चापि निर्लेपाचाम्लभोजिनः, पारिहारिकाणां ग्रीष्मे चतुर्थषष्ठाष्टमरूपं शिशिरे षष्ठाष्टमदशमरूपं वर्षास्वष्टमदशमद्वादशमरूपं जघन्यमध्यमोत्कृष्टभेदं तपः, पारणके च तेषां नित्यमाचाम्लं, द्वितीयषण्मासाननुपारिहारिकाः पारिहारिकत्वं पारिहारिकाश्चानुपारिहारिकत्वं प्रतिपद्यन्ते, तृतीयषण्मासान् कल्पस्थितः पूर्वोक्तं पारिहारिकतपः अपरेऽप्यपि निर्लेपाचाम्लतपः कुर्वन्ति, एवमष्टादशभिर्मासैरयं कल्पः परिपूर्णो भवति, तत्समाप्तौ च तमेव कल्पं जिनकल्पं वा प्रतिपद्यन्ते गच्छं वा समायान्ति, यः सर्वेषां समुदये, विशेषलब्धिसंपन्नान् साधूनाह–

मू. (३४) *खीरासवमहुआसव संभिन्नस्सो अकुट्ठबुद्धी अ ।*
चारणवेउव्विपयाणुसारिणो साहुणो सरणं ।।

वृ. 'खीरासव'त्ति चक्रवर्तिसम्बन्धिनो गोलक्षस्य भक्षितेक्षुक्षेत्रादिविशेषाहारस्यार्द्धार्द्धक्रमेण पीतगोक्षीरस्य पर्यन्ते यावदेकस्या गोः सबन्धि यत्क्षीरं तदिव येषां वचनं माधुर्यरसमाश्रवति–मुञ्चतीति क्षीराश्रवाः, मधु–शर्करादि मधुरद्रव्यं तद्रसतुल्यं वचनं येषां ते मध्वाश्रवाः, उपलक्षणत्वात्सर्पिराश्रवा अपि गृह्यन्ते, ते च सुगन्धघृतरसतुल्यवचनाः, तथा 'संभिन्नसोअ'त्ति ये सर्वैः शरीरावयवैः शृण्वन्ति जानन्ति च चक्रवर्तिस्कन्धावारसत्कमनुष्यतिरश्चां कोलाहलशब्दसंदोहान् अयमेतस्यायमेतस्येत्यादिव्यक्त्या पृथक् पृथक् भिन्नान् व्यवस्थापयन्ति इति वा संभिन्नश्रोतसः, 'कुट्ठबुद्धिय'त्ति नीरन्ध्रकोष्ठकक्षिप्तधान्यवद् ये सुनिश्चितस्थिरसंस्कारसूत्रार्थास्ते कोष्ठबुद्धयः ।

'चारण'त्ति अतिशयचरमाश्चारणाः, ते द्विधा–जङ्घाचारणा विद्याचारणाश्च, तत्राद्या

एकोत्पातेन रुचकवरद्वीपं यान्ति ततः प्रतिनिवृत्ता द्वितीयोत्पातेन नन्दीश्वरे तृतीयोत्पातेन यतो गतास्तत्रायान्ति, ऊर्ध्वदिशं त्वाश्रित्य ते प्रथमोत्पातेन पाण्डुकवनं द्वितीयोत्पातेन नन्दनवनं तृतीयोत्पातेन यतो गतास्तत्रायान्ति, तपोलब्धेः प्रयुज्यमानाया ह्रासभवनात्, विद्याचारणास्तु प्रथमोत्पातेन मानुषोत्तरनगं द्वितीयोत्पातेन नन्दीश्वरं तृतीयोत्पातेन यतो गतास्तत्रायान्ति, ऊर्ध्वं तु प्रथमोत्पातेन नन्दनवनं द्वितीयोत्पातेन पाण्डुकवनं तृतीयोत्पातेन यतो गतास्तत्रायान्ति, विद्यायाः प्रयुज्यमानाया वृद्धिभवनात्, तथाऽन्येऽपि बहुप्रकाराश्चारणा भवन्ति साधवः, तद्यथा—आकाशगामिनः पर्यङ्कावस्थानिषण्णाः कायोत्सर्गस्थशरीरा वा पादोत्क्षेपक्रमं विनापि व्योमचारिणः, केचित्तु फलपुष्पपत्रहिमवदादिगिरिश्रेणिअग्निशिखानीहारावश्यायमेघवारिधारामर्कटतन्तुज्योतीरश्मिपवनाद्यालम्बनगतिपरिणामकुशलाः तथा वापीनद्यादिजले तन्त्रीवानविरुद्धयन्तो भूमाविव पादोत्क्षेपनिक्षेपकुशला जलचारणाः, तथा भुव उपरि चतुरङ्गुलप्रमिते व्योम्नि पादोत्क्षेपनिक्षेपकुशला जंघाचारणा इति।

'विउव्वि'त्ति वैक्रियलब्धिसम्पन्नाः साधवः, ते च वैक्रियशक्त्या नानारूपैरसङ्ख्येयानपि द्वीपान् समुद्रांश्च पूरयन्ति, जम्बूद्वीपं तु मनुष्याद्यन्यतररूपैर्विभ्रति, 'पयाणुसारि'त्ति ये पूर्वापरपदानुसारतः स्वयं त्रुटितं पदमनुसरन्ति—पूरयन्ति ते पदानुसारिणः, इह चोपलक्षणत्वादामर्षौषध्यादिलब्धिसंपन्नाः साधवोऽत्र ज्ञेयाः, एते एवंविधभेदभिन्नाः साधवो मे शरणं भवन्तु॥

मू. (३५) *उज्झिअवयरविरोहा निज्झमदोहा पसंतमुहसोहा।*
अभिमयगुणसंदोहा हयमोहा साहुणो सरणं॥

वृ. अथ सर्वसाधुसाधारणगुणा ये साधवस्तान् गाथापञ्चकेनाह—वैरं—प्रभूतकालजं श्रीवीरजिनं प्रति त्रिपृष्ठभवनिहतसिंहजीवहालिकब्राह्मणस्य कपिलस्येव विरोधः—कुतश्चित्कारणात्तत्कालसम्भवोऽप्रीतिविशेषः, प्रतिमार्थं उदायनचण्डप्रद्योतयोरिव, अथवा वैरहेतवो विरोधाः वैरविरोधा उज्झिताः—त्यक्ता वैराणि विरोधाश्च यैस्ते तथा, यत एवोज्झितवैरविरोधा अत एव नित्यं—सततमद्रोहाः—परद्रोहवर्जिताः, वैरवत एव परद्रोहाभिप्रायसद्भावात्, यत एवाद्रोहा।

अत एव प्रशान्तता—प्रसन्ना मुखशोभा—वदनच्छाया येषां ते तथा, परद्रोहिणां हि मुखं विकरालं हि मुखं विकरालं स्यादिति, यत एवंरूपा अत एवाभिमताः—प्रशस्याः, पाठान्तरेऽभिगतस्सह धारी वा गुणसंदोहो—गुणनिकरो येषां ते तथा, एवंविधानां च ज्ञानातिशयः स्यादिति हतो मोहः—अज्ञानं यैस्ते तथा ज्ञानिन इत्यर्थः, ते साधवः शरणं भवन्तु॥

मू. (३६) *खंडिअसिनेहदामा अकामधामा निकामसुहकामा।*
सुपुरिसमणाभिरामा आयारामा मुनी सरणं॥

वृ. खण्डितानि—त्रोटितानि स्नेहरूपाणि दामानि—रज्जवः आर्द्रकुमारेणेव आत्मनो हस्तिनो वा यैस्ते खण्डितस्नेहदामानः छिन्नस्नेहनिगडा इत्यर्थः, यत एवंरूपा अत एव न विद्यते कामो—विषयाभिलाषो धामानि च—गृहाणि येषां, छिन्नस्नेहत्वे एव विषयगृहाणां त्यागः स्यादिति, अथवा न विद्यन्ते कामधामानि—विषयगृहाणि येषां ते तथा, विषयासक्तिहेतुरम्यमन्दिररहिता इत्यर्थः, अथवा न कामस्य धाम—स्थानं अकामधामाः, प्राकृतत्वात्पुंस्त्वं, यत एवंविधा अत एव निष्कामं निर्विषयं यत्सुखं—मोक्षसम्बन्धि तद्विषयोऽभिलाषो येषां ते तथा, निर्विषयस्यैव शिवशर्माभि-

लाषुकगत्वात् मोक्षसुखाभिलाषिण इत्यर्थ ।

तथा सत्पुरुषाणां–आचार्यादीनां इङ्गिताकारसम्पन्नत्वादिना स्वविनयेन वन्दारूणां स्वशान्तत्वादिना दमदन्तेनेव युधिष्ठिरादीनां मनः–चित्तमभिरमयन्ति–आनन्दयन्तीति सत्पुरुष-मनोऽभिरामाः, तथा त्यक्तान्यकृत्यत्वादात्मानं तासु तासुप्रवचनोक्तक्रियासुरमयन्ति–क्रीडयन्ती-त्यात्मारामाः, यद्वा आरामभिव–भव्यजीवानां क्रीडास्थानभिव आत्मा येषां हर्षहेतुत्वात्ते तथा, अथवा आधारं–पञ्चप्रकारमन्ति–गच्छन्तीत्याधारामाः मन्यन्ते–बुध्यन्ते जगतः कालत्रयावस्था-मिति मुनयः–साधवस्ते शरणं भवन्तु ॥

मू. (३७) *मिल्हिअविसयकसाया उज्झिअघरघरणिसंगसुहसाया ।*
अकलिअहरिसविसाया साहू सरणं गयपमाया ॥

वृ. 'मिल्हिअ'त्ति मिल्हिताः–अपास्ता विषयाः–शब्दाद्याः कषायाश्च–क्रोधाद्या यैस्ते तथा, विषयकषायरहिता इत्यर्थः, तथा गृहं–अगारं गृहिणी–कलत्रं तयोः सङ्गः–संबन्धस्तस्माद्यः सुखा- स्वादः–सुखानुभवः स उज्झितः–परिहृतो यैस्ते तथा निष्परिग्रहा निस्सङ्गाश्चेत्यर्थः–, तथा न कलितौ–नाश्रितौ हर्षविषादौ–प्रमोदवैमनस्ये यैस्ते तथा, समभावव्यवस्थिता इत्यर्थः, तथा गतः प्रमादो येभ्यस्ते तथाऽप्रमत्ता इत्यर्थः, 'विहुअसोआ' इति तु पाठे विधूतानि श्रोतांसि–आश्रव- द्वारलक्षणानि यैः यद्वा विधुतः–क्षिप्तः शोकः–चित्तखेदो यैस्ते तथा, विधूतासंयमस्थाना गतशोका वेत्यर्थः, ते साधवः शरणं भवन्तु ॥

मू. (३८) *हिंसाइदोससुन्ना कयकारूण्णा सयंभुरुप्पण्णा ।*
अजरामरपहखुण्णा साहू सरणं सुकयपुण्णा ॥

वृ. हिंसा आदिर्येषां ते हिंसादयः ते च ते दोषाश्च, आदिशब्दादलीकभाषणपरस्वापहार-स्त्रीसेवापरिग्रहादीनां ग्रहः, हिंसादिदोषैः शून्याः–तैर्विरहिता इत्यर्थः, तथा कृतं–विरचितं कारुण्यं–जीवलोकोपरि दुःखप्रहाणेच्छा यैस्ते तथा सर्वजीवेषु कृपार्द्रचेतस इत्यर्थः, तथा जीवाजीवादिपदार्थानां जिनोक्तानां यथास्थितत्वेन रोचनं–मननं श्रद्धानं रुक् सम्यक्त्वमित्यर्थः प्रज्ञानं प्रज्ञा–बुद्धिः सम्यग्ज्ञानमित्यर्थः, स्वयं भवित इति स्वयम्भूः स्वयम्भुवी रुकप्रज्ञे–सम्यक्त्वज्ञाने येषां ते स्वयम्भूरुकप्रज्ञा यद्वा स्वयंभुवा–स्वयम्भूतेन सम्यक्त्वेन क्षायिकादिना पूर्णा, दूरीकृतमिथ्यात्वा इत्यर्थः, 'पुन्न'इति पाठे इयं व्याख्या, यद्वा स्वयंभूशब्देन स्वयम्भूरमणः समुद्र उच्यते 'भीमो भीमसेन' इति वत्, ततस्तत्तुल्ये विस्तीर्णे ऋकप्रज्ञे तेषां ते तथा, अथवा 'स्वयम्परुप्पन्ना' इति पाठे स्वयंभराः–आत्मनिर्वाहकाः कस्याप्यनाश्रितत्वेनोत्पन्ना–व्यवस्थिताः स्वयंभरोत्पन्नाः ।

तथा न विद्यते जरामरौ यत्र तदजरामरं–निर्वाणं तस्य पथो–मार्गस्तदुपदर्शक-त्वाप्रवचनशास्त्राणीत्यर्थ तेषु क्षुण्णाः–निपुणाः, सम्यकतत्वस्य वेदिन इत्यर्थः, क्षुण्णः–पुनः पुनः परिशीलनेनासेवितोऽजरामरपथो–मोक्षमार्गो ज्ञानदर्शनचारित्रलक्षणो यैस्ते तथा, प्राकृतत्वात् क्षुण्णशब्दस्य परनिपातः, 'अजरामरबहुखुन्ना'इति पाठे तु अजरामरे–निर्वाणे वर्णयितव्ये बहु प्रभूतं यथा भवत्येवं क्षुण्णाः–सम्यग्मोक्षस्वरूपप्रकाशका इत्यर्थः, ते साधवः शरणं भवन्तु, पुनः किंभूतः–सुष्ठु–अतिशयेन कृतं पुण्यं–चारित्रप्राप्तिलक्षणं एष्यद्भवयोग्यं स्वर्गादिलाभलक्षणं वा यैस्ते सुकृतपुण्याः, तद्वा सुकृतैः–तपःप्रभृतिभि पूर्णा–भृताः संचितप्रभूततपस इत्यर्थ ॥

मू. (३९) *कामविडंबणचुक्का कलिमलमुक्का विमुक्कचोरिक्का ।*
पावरयसुरयरिक्का साहू गुणरयणचच्चिक्का ॥

वृ. काम्यते–अभिलष्यते विषयार्थिभिरिति कामस्तस्य कामस्य–स्मरजनितविकारस्य या विडम्बना–नाना विक्रियास्ताभिः परिवेष्टनं तस्याः 'चुक्क'त्ति प्राकृतत्वाच्च्युतास्तया रहिता ज्ञातपरमार्थत्वात् तां त्यक्तवन्त इत्यर्थः, तथा कलिमलं–पापं तेन मुक्ताः पवित्रधात्रीनीरेण तं प्रक्षालितवन्त इत्यर्थः, तथा 'विविक्क'त्ति विविक्तं–अदत्तादानियमेन आत्मनः पृथक्कृतं चौरिक्यं–चौर्यं यैस्ते तथा स्वामिजीवतीर्थकृद्गुर्वनुज्ञातवस्त्रभक्तपानादिग्रहणेन सर्वथापि तं परिहृतवन्त इत्यर्थः ।

तथा पातयति दुर्गतौ जीवानिति पापं तदेव रजः पापरजः तत्कारणत्वात् पापरजश्च तत्सुरतं–मैथुनं च पापरजःसुरतं तेन रिक्ताः–तत्यागिनो, नवगुप्तिसनाथब्रह्मव्रतधरणाद्, एवंविधाः साधवः शरणं, किंभूताः साधवः ?–गुणा–व्रतषट्कादयः त एव रत्नानि तैः चच्चिक्कत्ति–दीप्तिमन्तस्तैर्मण्डिता इत्यर्थः, यद्वा साधूनां गुणाः साधुगुणा इत्येवं कार्यं, प्राकृतत्वाद्दीर्घत्वं, साधव इति विशेष्यं तु परस्तादेव लभ्यते ॥

मू. (४०) *साहुत्ति मुद्धिओ ज आयरिओ तओ अ ते साहू ।*
साहुगहणेण गहिआ तम्हा ते साहुणो सरणं ॥

वृ. नन्वत्र साधुशरणाधिकारे ज्येष्ठपदवर्तित्वेनाचार्यादयः कथं गृह्यन्ते इति संशयापनोदायाह–साधुत्वे–साधुस्वरूपे समभावपरसाहाय्यदानमुक्तिसाधकयोगसाधनादिलक्षणे सुष्ठु–अतिशयेन स्थितास्तत्सेविन इत्यर्थः यद्वा साधुत्वेन सुस्थिताः–समाहिताः साधुत्वसुस्थिताः यद्–यस्मात्कारणादाचार्यादयः पञ्चापि ततश्च ते पञ्चापि साधव उच्यन्ते, तत्कार्यकरणात्, तस्मात्साधुभणितेन–साधुसत्कोच्चारेण गृहीतास्ते सर्वेऽप्यतीतानागतवर्तमानकालभाविनोऽत्राधिकारे मम शरणं भवेयुरिति ॥

उक्तं तृतीयं शरणं, अथ चतुर्थं शरणमाह–

मू. (४१) *पडिवन्नसाहुसरणो सरणं काउं पुणोऽवि जिनधम्मं ।*
पहरिसरोमंचपवंचकंचुअंचियतणू भणति ॥

वृ. साधुश्रावकाद्यन्यतमो जीवः प्रतिपन्नसाधुशरणः सन् पुनरपि जिनधर्मं शरणं कर्तुं–प्रतिपत्तुमिच्छन्नित्यध्याहार्यं, इदंवक्ष्यमाणं भणति, किंविशिष्टोऽसौ ? –प्रकृष्टो हर्ष प्रहर्ष–वदनविकासादिभिर्लक्ष्यो मानसः प्रीतिविशेषस्तद्वशेन यो रोमाञ्चप्रपञ्चः स एव कञ्चुकस्तेनाञ्चिता–विभूषिता तनुः–शरीरं यस्य स प्रहर्षरोमाञ्चप्रपञ्चकञ्चुकिततनुः, प्रमोदपूरिताङ्गः सन्नित्यर्थः, यद्भणति तदाह–

मू. (४२) *पवरसुकएहि पत्तं पत्तेहिवि नवरि केहिवि न पत्तं ।*
तं केवलिपन्नत्तं धम्मं सरणं पवन्नोऽहं ॥

वृ. प्रवरसुकृतैः–विशिष्टपुण्यैः प्राप्तं–लब्धं सम्यक्त्वदेशविरतिरूपं धर्ममिति संबन्धः, अर्धपुद्गलपरावर्त्ताभ्यन्तरीभूतभवैरेव भव्यजीवैरासन्नसिद्धिकैः प्राप्यमानत्वात्, तथा पात्रैरपि–भाग्यवद्भिरपि ब्रह्मदत्तचक्रयादिभिरिव कैश्चित् नवरीति–पुनरर्थेन प्राप्तं–नासादितं, पात्रत्वं च ब्रह्मदत्तस्य चक्रित्वलाभात्, देवेन्द्रचक्रवर्त्यादीनि हि भव्यानामेव भवन्तीति, तमेवंभूतं

केवलिभि–केवलज्ञानोपलब्धसमस्ततत्वैः प्रकाशितं धर्मं–श्रुतधर्म- चारित्रधर्मरूपं शरणं प्रपन्नोऽहमिति ॥

मू. (४३) *पत्तेण अपत्तेण य पत्ताणि अ जेण नरसुरसुहाणि ।*
मुक्खसुहं पुण पत्तेण नवरि धम्मो स मे सरणं ॥

वृ. अथ धर्मस्यैव माहात्म्यमुपदर्शयन्नाह–प्राप्तेनाप्राप्तेनापि–लब्धेनालब्धेनापि, केनेत्याह–येनै जैनधर्मेण नरसुरसुखानि प्राप्तानि, तत्र प्राप्तेन यथा लब्धसम्यक्त्वेन धनसार्थवाहेन नरसुखं– युगलिकसुखं प्राप्तं, अप्राप्तेनापि च यथा तेनैव तस्मिन्नेव भवे सम्यक्त्वलाभात् पूर्वं, प्राप्तेन धर्मेण सुरसुखं बहुभिरपि श्रीवीरजीवनयसारादिभिः अप्राप्तेन धर्मेण सुरसुखं 'तावस जा जोइसिआ चरगपरिव्वाय बंभलोगो जा' इत्यार्षैर्बहुभिः कपिलादिभिरिव लब्धं, यद्वा अनेकैः भव्यैः प्राप्तेन धर्मेण नरसुरसुखानि लब्धानि, अभव्यैश्च अप्राप्तेनापि तेन, तेषामप्यागमे केवलक्रियादिबलेन नवमग्रैवेयकं यावद्गमनश्रवणात् ।

मोक्षसुखं पुनर्येन धर्मेण प्राप्तेनैव प्राप्यते, नान्यथा, मरुदेवाप्रभृतयोऽपि यावत्चारित्रपरिणामं प्राप्यैव मोक्षं जग्मुरिति, नवरि–पुनः स धर्मो मम शरणं भवतु, अथ व्याख्यान्तरं–पात्रेण–ज्ञातिकुलसौभाग्या- दिगुणयुक्तेन तथा अपात्रेणापि–गुणवियुक्तेन दारिद्र्याद्युपहतेनापि प्राप्तानि–लब्धानि येन कारणेन नरसुरसुखानिमनुजदेवसमृद्धः, तत्र पात्रेण ऋजुत्वादिगुणवता वरुणसारथिमित्रेणैव नरसुखं–विदेहेषु सुकुलोत्पत्त्यादिकं यथा प्राप्तं, अपात्रेण–दौःस्थ्याक्रांतेन कौशाम्ब्यामार्यसुहस्ति- प्रव्रजितसम्प्रतिराजजीवद्रमकेणेव, पात्रेण सुरसुखं वसुदेवपूर्वभवनंदिषेणेनेव प्राप्तं, च एवकारार्थो भिन्नक्रमश्च पात्रेणेत्यत्र योज्यते, ततश्चायमर्थः नवरं–केवलं मोक्षसुखं–शिवशर्म पुनः पात्रेणैव चारित्रधर्माधारभूततथाभव्यत्वगुणलक्षणेनैव प्राप्यते, यस्य धर्मस्य प्राप्तेनैवेति शेषः, नान्यथेति, स धर्मो मम शरणं भवतु ।

मू. (४४) *निद्दलिअकलुसकम्मो कयसुहजम्मो खलीकयअहम्मो ।*
पमुहपरिणामरम्मो सरणं मे होउ जिनधम्मो ॥

वृ. निर्दलितानि–विदारितानि तत्कर्तृजनेभ्यः कलुषाणि–मलिनानि कर्माणि येन धरमेण स तथा, निर्धूतसर्वपाप इत्यर्थः, यत एवंविधोऽत एव कृतं शुभं जन्म कर्म वा सेवकजनेभ्यो गणधरतीर्थकरत्वादिप्राप्तिलक्षणं येन स कृतशुभजन्मा कृतशुभकर्मा वा, यत एवंविधोऽत एव खलीकृतो–दैरिवन्निर्द्धाटितो निसारितो वा अधर्मकुधर्मो वा सम्यक्त्ववासितान्तःकरणेभ्यो येन स तथा ।

तथाऽयं जिनधर्मः प्रमुखे–आदौ इहलोकेऽपि रम्यो धम्मिलादीनामिव परिणामे–परिपाकप्राप्तौ भवान्तरेऽपि दामन्नकादीनामिव रम्यो–मनोज्ञः, मिथ्यादृष्टिधर्मस्तु नैवंविधः, तस्यारम्भेऽपि पञ्चाग्नितपःप्रभृत्यादेर्महाकष्टहेतुत्वेन परिणामे परलोके च मिथ्यात्वरूपत्वाद्दुर्गतिमूलत्वेन चासुन्दरत्वात्, विषयसुखस्य तु आदौ सुन्दरत्वेऽपि परिणामे शनै शनैः इहलोके परलोके च कटुविपाकत्वाच्च, जिनधर्मस्त्वादौ परिणामेऽपि च रम्य एव, स एवंविधो धर्मो मे शरणं भवतु

मू. (४५) *कालत्तएवि न मयं जम्मणजरमरणवाहिसयसमयं ।*
अमयं व बहुमयं जिनमयं च धम्मं पवन्नोऽहं ॥

वृ. कालत्रयेऽपि–अतीतानागतवर्तमानरूपे न मृतो–न विनष्टस्तं नमृतं भरतैरवतेषु व्यवच्छेदसद्भावेऽपि महाविदेहेषु कालत्रयेऽपि धर्मस्य निरन्तर्येण सद्भावात्, तथा जन्म च जरा च मरणं च व्याधयश्च जन्मजरामरणव्याधयस्तेषां शतानि तानि शमयतीति जन्मजरामरणव्याधिशतशमकः, सिद्धिपदप्रदानेन तन्निवारक इत्यर्थः, तं, 'सुमय' मिति पाठे तु जन्मजरामरणव्याधिशतानि सुष्ठु–अतिशयेन मृतानि–विनष्टानि यस्मात्स तथा -

- सद्वर्णगन्धरसोपेतं बलवर्णसौभाग्यपुष्टिजननं सर्वरोगनाशनं वस्तु अमृतमुच्यते तदिव सकललोकस्यानन्दतुष्टिपुष्टिजनकत्वाद् बहुमतः सर्वस्याप्यतिशयेनामीष्ट इत्यर्थः, तं प्रक्रमायातं जिनधर्मं, न केवलं जिनधर्मं, किन्तु जिनप्रवचनमि–द्वादशाङ्गरूपं पूर्वोक्तगुणसुन्दरं शरणत्वेनाहं प्रपन्नः–आश्रित इत्यर्थः ।

मू. (४६) *पसमिअकामपमोहं दिट्ठादिट्ठेसु न कलिअविरोहं ।*
सिवसुखफलयममोहं धम्मं सरणं पवन्नोऽहं ॥

वृ. प्रकर्षेण कटुविपाकतादर्शनेनोपशमं नीतः कामस्य प्रकृष्टो मोहः–उन्मादो मोहो वा येन स तथा, निवारितकामोद्रेक इत्यर्थः, जिनधर्मभावितमतेः कामनिवृत्तिसद्भावात्, तथा दृष्टादृष्ट– दृष्टा–दृष्टविषया ये बादरैकेन्द्रियादयो जीवाः पुद्गलस्कन्धादयोऽजीवाश्च, तथाऽदृष्टाः सर्वलोक- वृत्तिसूक्ष्मैकेन्द्रियादिजीवा धर्माधर्मास्तिकायादयोऽजीवाश्च ।

स्वर्गनरकादयो वा येऽतिशयज्ञानज्ञानिगोचरास्तेषु दृष्टादृष्टेषु पदार्थेषु न कलितो–न प्राप्तो विरोधो–विपरीतप्ररूपणारूपो येन स तथा तं, केवलिप्रज्ञप्तत्वात् यथावस्थितस्वरूपावेदकमित्यर्थः, तथा शिवसुखमेव फलं तद्ददातीति शिवसुखफलदस्तं, अत एव न मोघोऽमोघः–अवन्ध्यः सफल इत्यर्थ तमेवंप्रकारं धर्मं शरणं प्रपन्नोऽहमिति ।

मू. (४७) *नरयगइगमणरोहं गुणसंदोहं पवाइनिक्खोऽहं ।*
निहणियवम्महजोहं धम्मं सरणं पवन्नोऽहं ॥

वृ. पापकारिणो नरान् कायन्ति–आह्वयन्तीति नरका–रत्नप्रभादिषु सीमन्तकाद्यास्त एव गम्यन्ते इति गतिस्तत्र यद्गमनं तद् रुणद्धि–निवारयतीति नरकगतिगमनरोधस्तं, तथा गुणानां–क्षान्त्यादीनं संदोहः–समुदायो यत्र स तथा तं, तथा प्रकृष्टा वादिनः प्रवादिनः, निरशब्दो निषेधार्थः, तैः प्रवादिभिः न क्षोभ्यते इति प्रवादिनिक्षोभ्यस्तं, अथवा प्रवादिभ्यो निर्गतः क्षोभः–कल्पनं यस्य स तथा, यद्वा प्रवादिनां नि–नितरां क्षोभो यस्मात्स तथा तं, सुयुक्तियुक्तत्वेन श्रीसर्वज्ञोक्तत्वेन च वादिभिः क्षोभयितुमशक्य इत्यर्थः, 'निहणिय'त्ति निहतो–नाशं नीतो मन्मययोधः–कामसुभटो येन स तथा, नवगुप्तिरचनारुचिरब्राह्मकवद्याश्रितत्वात् धर्मस्य, तं धर्मं शरणं प्रपन्नोऽहमिति ।

मू. (४८) *भासुरसुवन्नसुंदररयणालंकारगारवमहग्घं ।*
निहिमिव दोगच्चहरं धम्मं जिनदेसिअं वंदे ॥

वृ. अथ निधानोपमया धर्मस्य नमस्कारमाह–देवदिभासुरगतिहेतुत्वाद्भासुरः–शोभनो वर्णः–श्लाघागुणोत्कीर्त्तनरूपो यस्मात्स सुवर्ण, चारित्रवतामिन्द्रादिभिरपि श्लाघनीयत्वात्, तथा सुन्दरा–मनोज्ञा या क्रियाकलापविषया इच्छामिच्छेत्यादिदशविधसामाचार्यादिरूपा या रचना–विविधकल्पना सैव तया बाऽलङ्कारः–शोभाविशेषो यस्य स सुन्दररचनालङ्कारः, तथा

गौरवं–महत्वं तद्धेतुत्वाद्धर्मोऽपि गौरवं तथा महानर्थो–माहात्म्यविशेषो यस्य स महार्थः, चारित्रवतामामर्षौषध्यादिमाहात्म्यविशेषसंभवात्, ततः पञ्चानामपि विशेषणानां कर्मधारयः, अथवा शोभनो वर्णः–श्लाघा तेन सुन्दरा या सामाचार्यादिरचना सैवालङ्कारो यस्येति एकमेव कार्यं, चारित्रपक्षेऽयं पूर्वोक्तोऽर्थः, श्रुतधर्मपक्षे तु रचना पदपङ्क्त्या भास्वरो ज्ञानादिभि केवलिभिरुक्तत्वात् भास्वरः शोभना वर्णाः–अक्षराणि तेषां तथा सुन्दरा या विरचना तस्या योऽलङ्कारो–द्वात्रिंशत्सूत्रदोषपरिहारेणाष्टगुणधारणेन च शोभाविशेषः तस्माद् यद्गौरवं–गुरुत्वं अन्तार्थवादिरूपं तेन महानर्थः–आधिक्यं पूजातिशयो वा यस्य स तथा, ततो विशेषणद्वयकर्मधारयः, अथवा भासुरेति वर्णविशेषणं कार्यं, यद्वा भासुरसुवर्णसुन्दररचनालंकारेण गौरवं–गुरुत्वं यस्य स तथा, महार्थमिति पृथक्कृत्वा समस्यते।

निधिपक्षे पुनर्भासुरं–दीप्तिमत् सुवर्णं–कनकं सुन्दराणि यानि रत्नानि अलङ्कारा–हाराद्याभरणविशेषास्ती गौरवं–सम्पूर्णता तेन महार्घो–बहुमूल्यः, 'दोगच्चि'ति चारित्रधर्मपक्षे दुष्टा गतिर्दुर्गति–कुदेवत्वकुमानुषत्वतिर्यग्नरकलक्षणा तस्या दुर्गतेर्भावो दौर्गत्यं, श्रुतधर्मपक्षे तु गत्यर्था ज्ञानार्था धातवः अतो गति–ज्ञानं दुष्टा गतिः दुर्गतिः अज्ञानमित्यर्थः तद्धरतीति दौर्गत्यहरं, निधानपक्षे तु दुर्गतस्य–दरिद्रस्य भावो दौर्गत्यं तद्धरतीति दौर्गत्यहरं दारिद्र्यापहारकृदित्यर्थः, एवंविधनिधानोपमितं धर्मं श्रीजिनैः–श्रीसर्वज्ञैः देशितं–उपदिष्टं वन्दे–नमस्कुर्वेऽहमित्यर्थः।

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता चतुःशरण प्रकिर्णके प्रथमाधिकारस्य विजयविमलविरचिता टीका परिसमाप्ता।

–उक्तश्चतुःशरणरूपः प्रथमोऽधिकारः, अथ दुष्कृतगर्हारूपं द्वितीयमधिकारमाह–

मू. (४९) *चउसरणगमणसंचिअसरचरिअरोमंचअंचिअसरीरो।*
कयदुक्कडगरिहाअसुहकम्मक्खयकंखिरो भणइ॥

वृ. चतुःशरणगमनेन–चतुःशरणाङ्गीकारेण संचितं–राशीकृतं यत्सुचरितं–पुण्यं तेन यौऽसौ रोमाञ्चो–रोमोल्लासस्तेनाञ्चितं–भूषितं शरीरं यस्य स तथा, चतुःशरणगमनार्जितसुकृतवशात् कंटकितगात्र इत्यर्थः, तथा कृतानि–इहभवे–ऽन्यभवे च विदितानि यानि दुष्कृतानि–पापकृत्यानि तेषां गर्हा–गुरुसमक्षं 'हा दुट्ठु कय'मित्यादिनिन्दा तया योऽसौ अशुभकर्मक्षयः–पापकर्मापगमः तत्र कांक्षिरः–आकांक्षावान् भणति, दुष्कृतगर्हातो यः पापापगमो भवति तमात्मनः समभिलषन् एवं वक्ष्यमाणं वदतीत्यर्थः॥

मू. (५०) *इहभविअमन्नभविअं मिच्छत्तपवत्तणं जमहिगरणं।*
जिनपवयणपडिकुट्ठं दुट्ठं गरिहामि तं पावं॥

वृ. यच्च भणति तदाह–इह–अस्मिन् भवे यत्कृतं तदिहभविकं, अन्यस्मिन् भवे भवमन्यभविकं अतीतभविष्यद्भवसंभवमित्यर्थो, मिथ्यात्वप्रवर्त्तनं–कुतीर्थिकदानसन्मानतद्देवार्चनतद्वैत्यकारापणाद्यधिकरणं, अन्यदपि चाधिकरणं भवनारामतटाकादिकारणसघनुःखड्गादिशस्त्रयन्त्रगन्त्रीहलोदूखलशृङ्खलादिविधापनदानादिरूपं यत्कृतमिति शेषः, तथाऽन्यच्च जिनप्रवचने यत्प्रतिकुष्टं–प्रतिषिद्धं दुष्टं तत्पापं गर्हामि–जुगुप्सामीत्यर्थः।

मू. (५१) *मिच्छत्ततमंधेणं अरिहंताइसु अवन्नवयणं जं।*
अन्नाणेण विरइअं इण्हिं गरिहामि तं पावं॥

वृ. उक्ता सामान्येन दुष्कृतगर्हा, सम्प्रति विशेषेण तामाह–मिथ्यात्वमेव तमः–अन्धकारः तेनान्धस्तेन मिथ्यात्वतमोऽन्धेन, मिथ्यात्वशास्त्रोपहतभावचक्षुषा जीवेनेति शेषः, 'अर्हदादिषु' अर्हत्सिद्धाचार्योपाध्यायादिषु पूजाबहुमानार्हेषु 'अवण्णवयणं जं'ति अवर्णवादवचनं–असद्दोषकथनं अवज्ञावचनं वा हीलारूपं यदज्ञानेन–विवेकशून्येन उक्तमिति शेषः, तथा विरचितं–कृतं कारितमनुमतं चातीतानागतवर्तमानकाले, यद्वान्यदपि जिनधर्मप्रत्यनीकत्ववितथप्ररूपणापरदेवधर्मस्थानादिरूपं, इदानीमवगतपरमार्थस्तत्पापं गर्हामि–निन्दामि गुरुसमक्षमालोचयामीत्यर्थः

मू. (५२) *सुअधम्मसंघसाहुसु पावं पडिनीअयाइ जं रइअं।*
अन्नेसु अ पावेसु इण्हिं गरिहामि तं पावं॥

वृ. श्रुतं च धर्मश्च संघश्च साधवश्च श्रुतधर्मसंघसाधवः तेषु पापं–आशातनारूपं प्रत्यनीकतया–विद्विष्टभावेन यद्रचितं, तत्र श्रुतस्य–द्वादशांगरूपस्य तदध्येत्राध्यापकानामुपरि यदरुच्यबहुमानादि चिन्तनं 'अज्ञानमेव सोभन'मिति भणता पूर्वभवे माषतुषस्येव धर्मप्रत्यनीकता 'कविला इत्थंपि इहयंपी'ति भणतो मरीचेरिव संघप्रत्यनीकतां संमेतशैलयात्रागच्छतश्रीसंघविलुण्टकानां सगरसुतजीवपूर्वभवचौराणामिव साधुप्रत्यनीकता गजसुकुमालं प्रति सोमिलद्विजस्येव।

तथा सर्वेषांश्रुतधर्मार्हदाचार्योपाध्यायसाधूनामुपरि प्रत्यनीकता नमुचिदत्तगोशालकादीनामिव ज्ञेया, तथाऽन्येष्वपि पापेषु–अष्टादशसु प्राणातिपातादिषु यत् किमपि पापं–जीवव्यपरोपणादिकं कृतं तदप्यधुना गर्हामीत्यर्थः।

मू. (५३) *अन्नेसु अ जीवेसु अ मित्तीकरनाइगोअरेसु कयं।*
परिआवणाइ दुक्खं इण्हिं गरिहामि तं पावं॥

वृ. यद्योक्तं–'अन्नेसु अ पावेसु'त्ति तदेव व्यक्तीकर्तुमाह–अन्येष्वपि जीवेषु–तीर्थकरादिव्यतिरिक्तेषु एकेन्द्रियादिसर्वभेदभिन्नेषु मैत्रीकारुण्यमाध्यस्थ्यानि विधेयतया गोचरो–विषयो येषां ते तथा तेषु कृतं–निष्पादितं 'परिआवणाइ'त्ति परितापनारूपमध्यपदग्रहणात्तुलादण्डन्यायेनाभिहतादिभिर्दशभिः पदैस्तेषु जीवेषु यत्किमपि दुःखं–कष्टं कृतमिदानीं तदपि पापं गर्हामि–जुगुप्साम्यालोचयामीतियावत्।

मू. (५४) *जं मनवयकाएहिं कयकारिअअनुमईहिं आयरिअं।*
धम्मविरुद्धमसुद्धं सव्वं गरिहामि तं पावं॥

वृ. अथोपसंहारमाह–यत्किञ्चित् पापं कृत्यं मनोवाक्काये रागद्वेषमोहाज्ञानवशात् कृतकारितानुमतिभिराचरितं–विहितं धर्मस्य–जिनधर्मस्य विरुद्धं–प्रतिकूलं अतएवाशुद्धं–सदोषं सर्वं समस्तमपि तत्पापं गर्हामि–अपुनःकरणेनाङ्गीकरोमि–गुरुसन्निधावालोचयामि।

–उक्त दुष्कृतगर्हारूपोद्वितीयोऽधिकारः, अधुना सुकृतानुमोदनारूपं तृतीयाधिकारमाह–

मू. (५५) *अह सो दुक्कडगरिहावलिउक्कडदुक्कडो फुडं भणई।*
सुकडानुरायसमुइण्णपुण्णपुलयंकुरकरालो॥

वृ. 'अथे'ति दुष्कृतगर्हानन्तरं सः–साध्वादिको जीवः, कथम्भूतः ?–दुष्कृतगर्हया–दुश्चरित्रनिन्दनेन दलितानि–चूर्णीकृतानि उत्कटानि–प्रबलानि दुष्कृतानि–पापानि येन स तथा, दुष्कृतगर्हया प्रतिहतमहापातकनिकर इत्यर्थः, एवं–विधः सन् स्फुटं यथा स्यादेवं भणति, पुनः

स किंभूतः ? –सुकृतानुरागेण–सुचरितबहुमाने समुदीर्णा–संजाताः पुण्यबन्धहेतुत्वात् पुण्याः–पवित्रा ये पुलकाङ्कुरा–रोमोद्गमविशेषाः तैः करालो–व्याप्तः कर्मवैरिणं प्रति भीषणो वा ।

मू. (५६) *अरिहंतं अरिहंतेसु जं च सिद्धत्तणं च सिद्धेसु ।*
आयारं आयरिए उवज्झायत्तं उवज्झाए ॥

वृ. यद्भाषते तद्गाथाद्वयेनाह–अर्हत्त्वं–तीर्थकरत्वं प्रतिदिनं द्विधर्मदेशनाकरणभव्यनिकरप्रतिबोधनतीर्थप्रवर्त्तनादिकं अर्हत्सु तदनुमन्येऽहमिति सम्बन्धः, यच्च सिद्धत्वं–सदा केवलज्ञानोपयुक्तत्वसर्वकर्मविमुक्तत्वनिरुपमसुखभोक्तत्वादिरूपं सिद्धेषु अनुमन्ये, तथाऽऽचारं–ज्ञानाचारादिरूपं पञ्चविधमाचार्येषु अनुमन्ये, तथा उपाध्यायत्वं–सिद्धान्ताध्यापकत्वरूपमुपाध्यायेऽनुमन्ये इति ।

मू. (५७) *साहूण साहुथरिअं देसविरइं च सावयजणाणं ।*
अणुमन्ने सव्वेसिं सम्मत्तं सम्मदिट्ठीणं ॥

वृ. तथा साधूनां–सामायिकादिचारित्रवतां पुलाकबकुशादिभेदभिन्नानां जिनकल्पिकप्रतिमाधरयथालन्दिकपरिहारविशुद्धिककलपातीतप्रत्येकबुद्धबोधितादिभेदैरनेकविधानां सर्वकालक्षेत्रविशेषितानां साधुचरितं–चरणादिक्रियाकलापं ज्ञानदर्शनचारित्रधारित्वसमभावत्वासहायसहायत्वादिरूपं वाऽनुमन्ये, 'साहुकिरिय'मिति पाठान्तरे तु साधुक्रियां–सर्वसाधुसामाचारीरूपां इत्यर्थः, तथा देशविरतिं–सम्यक्त्वाणुव्रतगुणव्रतशिक्षाव्रतैकादशप्रतिमादिरूपां, केषां ? –

'श्रां पाके' श्रान्ति–पचन्ति तत्त्वार्थश्रद्धानं निष्ठां नयन्तीति श्राः 'टुवपी बीजसंताने' वपन्ति–जिनभवनादिसप्तक्षेत्रेषु निजधनबीजानि इति वाः 'कृत् विक्षेपे' किरन्ति–विक्षिपन्ति क्लिष्टकर्मरज इति काः, श्राश्च वाश्च काश्च श्रावकास्ते च ते जनाश्च श्रावकजनास्तेषां श्रावकत्वमनुमन्ये, तथा सर्वेषां सम्यक्त्वं सम्यक्त्वं–जिनोक्ततत्त्वश्रद्धानरूपं 'तमेव सच्चं निस्संकं जं जिणेहिं पवेइअ'मिति निश्चयलक्षणं अनुमन्ये, केषां ? –सम्यग्–अविपर्यस्ता दृष्टि–दर्शनं येषां ते सम्यग्दृष्टयः तेषामस्यग्दृष्टीनां, अविरतनानामपि सुरेरप्यचाल्यसम्यक्त्वानां श्रेणिकादीनीमिवेत्यर्थः ।

मू. (५८) *अहवा सव्वं चिय वीअरायवयणाणुसारि जं सुकडं ।*
कालत्तएवि तिविहं अनुमोएमो तयं सव्वं ॥

वृ. अथ सर्वानुमोदनार्हसंग्रहमाह–'अथवे'ति सामान्यरूपप्रकारदर्शने 'चिअ' एवकारार्थे, ततः सर्वमेव वीतरागवचनानुसारि–जिनमतानुयायि यत् सुकृतं–जिनभवनबिंबकरणतत्प्रतिष्ठासिद्धान्तपुस्तकलेखनतीर्थयात्राश्रीसंघवात्सल्यजिनशासनप्रभावनाज्ञानाद्युपष्टंभधर्मसान्निध्यक्षमामार्दवसंवेगादिरूपं मिथ्यादृक्संबन्ध्यपि मार्गानुयायि कृत्यं कालत्रयेऽपि त्रिविधं मनोवाक्कायैः कृतं कारितमनुमतं च यदभूत् भवति भविष्यति चेति ।

'तकत्' इति ततशब्दात् 'त्यादिसवदिः स्वरेष्वंत्या' दिति सूत्रेण स्वार्थेऽकप्रत्यये रूपं, तदित्यर्थः, तत् सर्वं–निरवशेषमनुमोदयामः–अनुमन्यामहे, हर्षगोचरतां प्रापयाम इत्यर्थः, बहुवचनं चात्र पूर्वोक्तचतुःशरणादिप्रतिपत्त्या उपार्जितपुण्यसंभारत्वेन स्वात्मनि बहुमानसूचनार्थं ।

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता चतुःशरणप्रकिर्णके
तृतीयाधिकारस्य विजय विमलगणिना विरचिता टीका परिसमाप्ता ।

तदेवमुक्तः सुकृतानुमोदनारूपस्तृतीयोऽधिकारः, अथ चतुःशरणादिकृत्ये यत्फलं

स्यात्तदाद्यद्वयेनाह–

मू. (५९) *सुहपरिणामो निच्चं चउसरणगमाइ आयरं जीवो ।*
कुसलपयडीउ बंधइ बद्धाउ सुहानुबंधाओ ।।

वृ. शुभपरिणामः–प्रशस्तमनोऽध्यवसायः सन् नित्यं–सदैव चतुःशरणगमनादि–चतुःशरणगमनदुष्कृतगर्हासुकृतानुमोदनान्याचरन्–कुर्वन् साधुप्रभृतिको जीवः कुशलं–पुण्यं तत्प्रकृतीः 'साउच्चगोअमणुदुगे'त्यादिगाथोक्ताः द्विचत्वारिंशत्संख्याः बध्नाति, शुभाध्यवायबध्यमानत्वात्तासां, तथा ताश्च प्रकृतीर्बद्धाः सतीः शुभाध्यवसायवशाच्छुभोऽनुबन्धः–उत्तरकालफलविपाकरूपो यासां ताः शुभानुबन्धाः एवंविधाः करोतीत्यर्थः, तथा ता एव शुभप्रकृतीः ।

मू. (६०) *मंदनुभावा बद्धा तिव्वनुभावाउ कुणइ ता चेव ।*
असुहाउ निरनुबंधाउ कुणइ तिव्वाउ मंदाओ ।।

वृ. प्राग्मन्दानुभावाद् बद्धाः–स्वल्पशुभपरिणामवशान्मन्दरसा बद्धा विशिष्टतरशुभाध्यवसायवशात्तीव्रोऽनुभावो–रसो यासां तास्तीव्रानुभावाः–अत्युत्कटरसाः करोति, उपलक्षणादल्पकालस्थितीः दीर्घकालस्थितीः करोति अल्पप्रदेशका बहुप्रदेशकाश्च करोतीत्यपि ज्ञेयं, तथा 'असुहाउ'त्ति याश्चाशुभा 'नाणंतरायदसग'मित्यादिगाथोक्ता द्व्यशीतिसंख्याः पूर्वं बद्धाः स्युस्ता निर्गतोऽनुबन्धः–उत्तरकालफलविपाकरूपो याभ्यस्ताः निरनुबन्धाः एवंविधाः करोति, तद्विपाकजनितं दुःखमुत्तरकाले तस्य न भवतीत्यर्थः, तथा ता एव यास्तीव्राः–तीव्ररसाः प्राक् तीव्राशुभपरिणामेन बद्धास्ता मन्दाः–मन्दरसाः करोति चतुःशरणगमनादिरूपशुभाध्यवसायबलाद्, अत्रापि उपलक्षणाद्दीर्घकालस्थितीरल्पकालस्थितीर्बहुप्रदेशका अल्पप्रदेशकाश्च करोतीत्यपि ज्ञेयं, शुभपरिणामवशादशुभप्रकृतीनां स्थितिरसप्रदेशानां ह्राससम्भवात्, वन्दनकदानात् श्रीविष्णोरिवेत्यर्थः ।

–उक्तं चतुःशरप्रतिपत्त्यादेर्महत्फलं, अत एव तदवश्यं कर्त्तव्यमिति दर्शयति–

मू. (६१) *ता एयं कायव्वं बुहेहि निच्चंपि संकिलेसम्मि ।*
होइ तिकालं सम्मं असंकिलेसंमि सुकयफलं ।।

वृ. 'ता'इति तस्मात्कारणात् 'एयं'ति एतदनन्तरोक्तं चतुःशरणादि कर्त्तव्यमिति–विधेयं विबुधैः–अवगततत्त्वैर्नित्यमपि–सततमपि, कस्मिन्? –संक्लेशे–रोगाद्यापद्रूपे, एतेन यथा कर्षकैः शाल्यादिबीजं शस्यनिष्पत्तये उप्तमपि पलालाद्यानुषङ्गिकं जनयति एवं चतुःशरणाद्यपि सततं कर्मनिर्जरायै क्रियमाणमिहलोकेऽपि रोगाद्युपसर्गोपशान्तिं तनोतीति दर्शितं, तथा असंक्लेशो–रोगाद्यभावस्तस्मिन् चतुःशरणादि भवति त्रिकालं–सन्ध्यात्रयरूपे काले विधीयमानमिति शेषः ।

सम्यग्मनोवाक्कायोपयुक्ततया, कथं भवतीत्याह–'सुगईफलं'ति शोभना गतिः सुगतिः–स्वर्गापवर्गरूपा सैव फलं यस्य तत्सुगतिफलं, स्वर्गमोक्षप्राप्तिफलमित्यर्थः, सम्यक्चतुःशरणादिकृतां साधूनामुत्कर्षतो मोक्षं यावत् श्राद्धानामच्युतं यावद्व गतेः श्रीसिद्धान्ते प्रोक्तत्वात्, 'सुकयफल'मिति पाठे तु सुकृतं–पुण्यं शुभानुबन्धि तत्प्राप्ति फलं भवतीत्यर्थः ।

अथ योऽतीव दुर्लभां मनुष्यत्वादिसामग्रीं प्राप्यापि चतुःशरणादि प्रमादादिना न कृतवान् तं शोचयति–

मू. (६२) *चउरंगो जिनधम्मो न कओ चउरंगसरणमवि न कयं ।*
चउरंगभवच्छेओ न कओ हा हारिओ जम्मो ॥

वृ. चत्वारि–दानशीलतपोभावनारूपाणि अङ्गानि यस्य स चतुरङ्गो–दानादिचतुष्प्रकार इत्यर्थः जिनधर्मः–अर्हद्धर्मो न कृतो– विहितः आलस्यमोहादिभिः कारणैर्विगतविवेकत्वात्, तथा न केवलं चतुरङ्गधर्मो न कृतः, किन्तु चतुरङ्गं शरणमपि–अर्हत्सिद्धसाधुधर्मरूपमपि न कृतं, तथा चतुरङ्गभवस्य–नरकतिर्यग्नरामरलक्षणस्य छेदो–विनाशो विशिष्टचारित्रतपश्चरणादिना न कृतो येनेत्यध्याहार्यं तेन ।

- 'हा' इति खेदे हारितं–वृथा नीतं जन्म–मनुष्यभवः, प्राकृतत्वात्पुंस्त्वं, तस्य हारणं च अकृतधर्मस्य जीवस्य पुनरतिशयेन मानुषस्य दुष्प्रापत्वाद् अथवा स एव प्रमादादिना पूर्वमनाराधितजिनधर्मा अन्त्यसमये संजातविवेकः स्वयमात्मानं शोचयति–चतुरङ्गो जिनधर्मो मया न कृत इत्यादि हा मया हारितं–निष्फलीकृतं मनुष्यजन्म, देवा अपि विषयप्रमादादकृतजिनजन्मोत्सवादिपुण्याश्चयवनसमये अनेनैव प्रकारेण खेदं कुर्वन्ति ।

अथ प्रस्तुताध्ययनोपसंहारमाह–

मू. (६३) *इइ जीव पमायमहारिवीरभद्दन्तमेवमज्झयणं ।*
झाएसु तिसंझमवंझकारणं निव्वुइसुहाणं ॥

वृ. 'इति' उक्तप्रकारेण हे जीव!–हे आत्मन्! एतदध्ययनं ध्याय–स्मर त्रिसन्ध्यं–संध्यात्रये इति संबन्धः, कथंभूतं ?–'पमायमहारिवीरं'ति प्रमादा एव महान्तोऽरयः–शत्रवः, चतुर्दशपूर्वधरादीनामपि निगोदादिदुर्गतिपातहेतुत्वाद्अप्रमादस्य, तेषां प्रमादमहारीणां विनाशाय वीरवद्वीरं सुभटकल्पमित्यर्थः, प्राकृतत्वादनुस्वारलोपः, पुनः कथंभूतं ?–भद्रमन्ते यस्मात्तद्भद्रान्तं–मोक्षप्रापकमित्यर्थः, अथवा हे वीर हे भद्रेति संबोधनपदद्वयं जीवस्योत्साहवृद्धिहेतुः, 'अंत'मिति जीवितान्तं यावदेवैतदध्ययनं ध्यायेत्यर्थः, पुनः किंभूतं ?–अवन्ध्यकारणं–सफलकारणं, केषां निर्वृत्ति–मोक्षस्तत्सुखानामिति ।

'जिअ'इति पाठे तु जितप्रमादमहारिपूर्वोऽसौ वीरभद्रः साधुः श्रीवीरसत्कचतुर्दशसहस्रसाधुमध्यवर्ती तस्येदं जितं तदेतदध्ययनं ध्यायेत्यादि, एवं शास्त्रकर्तुः समासगर्भमभिधानमुक्तं, अस्य चाध्ययनस्य वीरभद्रसाधुकृतत्वज्ञापनेन यस्य जिनस्य यावन्तो मुनयो वैनयिक्यौत्पत्तिक्यादिबुद्धिमन्तः प्रत्येकबुद्धा अपि तावन्त एव प्रकीर्णकानि अपि तावन्ति भवन्तीति ज्ञापितं भवतीति गाथार्थ ।

२४ | प्रथम प्रकिर्णकं चतुःशरणं – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता चतुःशरणप्रकीर्णकस्य विजयविमलगणिविरचिता टीका (अवचूर्णिः) परिसमाप्ता ।

* * *